

आज़ादी का अमृत महोत्सव

# संस्कृतभाषा अभ्यासपुस्तिका

## वेदभूषणचतुर्थवर्षम् / पूर्वमध्यमा प्रथमवर्षम् / कक्षा नवमी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशस्सुखकरी विद्या गुरूणां गुरुः ।
उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
हितं मनोहारि च दुर्लभं वचः ।
सहसा विदधीत न क्रियाम् ।
विचित्ररूपाः खलु चित्तवृत्तयः ।
विद्याविहीनः पशुः ।
समत्वं योग उच्यते ।









**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)**
(भारतसर्वकारस्य शिक्षामन्त्रालयः)
**Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in**

# प्रथमः पाठः

## बुद्धिर्यस्य बलं तस्य

विश्वविख्याते संस्कृतकथासाहित्ये नीतिकथाः महत्तमं स्थानं भजन्ते। तासु कथाग्रन्थेषु विष्णुशर्मनाम पण्डितः विरचितस्य पञ्चतन्त्रकथाः लोकनीतिं राजनीतिं समाजनीतिञ्च बोधयन्ति। ग्रन्थेऽस्मिन् मित्रलाभः, मित्रभेदः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं चेति पञ्चतन्त्राणि वर्तन्ते। पञ्चतन्त्रादेका कथा अत्र वर्णितास्ति। दुर्जनानां सज्जनानां च स्वभावादयः अत्र वर्णितास्सन्ति।

अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बूपादपः सदाफलः, तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। तत्र च तस्य तरोरधः कदाचित् करालमुखो नाम मकरः समुद्रसलिलात् निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते न्यविशत्। ततश्च रक्तमुखेन स प्रोक्तः "भोः! भवान् समभ्यागतोऽतिथिः। तद्भक्षयतु मया दत्तानि अमृततुल्यानि जम्बूफलानि।

सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनमगात्। एवं नित्यमेव तौ वानरमकरौ जम्बूच्छायास्थितौ विविधशास्त्रगोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः। सोऽपि मकरो भक्षितशेषाणि जम्बूफलानि गृहं गत्वा स्वपत्न्यैः प्रयच्छति। अथ अन्यतमे दिवसे तया स पृष्टः – "नाथ ! क्व एवं विधानि अमृतफलानि प्राप्नोषि"? स आह - "भद्रे मम अस्ति परमसुहृद् रक्तमुखो नाम वानरः, सः प्रीतिपूर्वकमिमानि फलानि प्रयच्छति"। अथ तया अभिहितम् – "यः सदा एव अमृतप्रायाणि ईदृशानि फलानि भक्षयति तस्य हृदयममृतमयं भविष्यति। तद्यदि मया भार्य्या ते प्रयोजनम्, ततः तस्य हृदयं मह्यं प्रयच्छ, येन तद्भक्षयित्वा जरामरणरहिता त्वया सह भोगान् भुनज्मि"। स आह - 'भद्रे ! मा मा एवं वद । यतः स प्रतिपन्नोऽस्माकं भ्राता, अपरं फलदाता, ततो व्यापादयितुं न शक्यते।

अथ मकरी आह - यदि तस्य हृदयं न भक्षयामि, तत् मया प्रायोपवेशनं कृतं विद्धि। एवं तस्याः, तं निश्चयं ज्ञात्वा चिन्ताव्याकुलीयहृदयः वानरपार्श्वमगमत्। वानरोऽपि चिरादायान्तं तं सोद्वेगमवलोक्य प्रोवाच "भो मित्र! किमद्य चिरवेलायां समायातोऽसि ? स आह- "मित्र ! अहं तव भातृजायया निष्ठुरतरैर्वाक्यैरभिहितः- भो कृतघ्न ! मा मे त्वं स्वमुखं दर्शय, यतः त्वं प्रतिदिनं मित्रम् उपजीवसि न च तस्य पुनः प्रत्युपकारं गृहदर्शनमात्रेण अपि करोषि। तत् त्वं मम देवरं गृहीत्वा अद्य प्रत्युपकारार्थं गृहमानय। नो चेत् त्वया सह मे परलोके दर्शनम्"। अहं तया एवं प्रोक्तः तव सकाशमागतः। तत् आगच्छ मे गृहम्।

मर्कट आह - "भो मित्र! युक्तमभिहितं मद् भ्रातृपत्न्या।" परं वयं वनचराः, युष्मदीयञ्च जलान्ते गृहम्, तत् कथं शक्यते तत्र गन्तुम्, तस्मात् तामपि मे भातृपत्नीमत्र आनय येन प्रणम्य तस्या आशीर्वादं गृह्णामि। स आह - "भो मित्र! अस्ति समुद्रान्तरे सुरम्ये पुलिनप्रदेशेऽस्मद्गृहम्। तन्मम पृष्ठमारूढः सुखेन अकृतभयो गच्छ"। सोऽपि तच्छ्रुत्वा सानन्दमाह "भद्र! यदि एवं तत् किं विलम्ब्यते त्वर्य्यताम्। तथानुष्ठितेऽगाधे जलधौ गच्छन्तं मकरमालोक्य भयत्रस्तमना वानरः प्रोवाच - "भ्रातः! शनैः शनैर्गम्यताम्। जलकल्लोलैः प्लाव्यते मे शरीरम्"। असौ अगाधं जलं प्राप्तो मे वशः सञ्जातः, मत्पृष्ठगतः तिलमात्रमपि चलितुं न शक्नोति। तस्मात् कथयामि अस्य निजाभिप्रायं येन अभीष्टदेवता स्मरणं करोति"।

आह च - "मित्र! त्वं मया वधाय समानीतो भार्य्यावाक्येन विश्वास्य। तत् स्मर्य्यतामभीष्टदेवता"। स आह - " भ्रातः! किं मया तस्याः तवापि च अपकृतम् ? येन मे वधोपायः चिन्तितः"। मकर आह - "भोः! तस्याः तावत् तव हृदयस्य अमृतमयफल- रसास्वादनमृष्टस्य भक्षणे दोहदः सञ्जातः, तेन एतदनुष्ठितम्"। प्रत्युत्पन्नमतिः वानर आह - "भद्र! यदि एवं तत् किं त्वया मम तत्र एवं न व्याहृतम् ? येन स्वहृदयं जम्बूकोटरे सदा एव मया सुगुप्तं कृतम्। तद् भ्रातृपत्न्या अर्पयामि। त्वया अहं शून्यहृदयोऽत्र कस्मात् आनीतः?" तदा आकर्ण्य मकरः सानन्दमाह - "भद्र! यदि एवं तदर्पय मे हृदयं येन सा दुष्टपत्नी तद्भक्षयित्वा अनशनादुत्तिष्ठति। अहं त्वां तमेव जम्बूपादपं प्रापयामि"। एवमुक्त्वा निवर्त्त्य जम्बूतलमगात्। वानरोऽपि कथमपि जल्पितविविधदेवतोपचारपूजः तीरमासादितवान्। ततश्च दीर्घतरचङ्क्रमणेन तमेव जम्बूपादपमारुढः चिन्तयामास "अहो ! लब्धाः तावत् प्राणाः। अथवा साधु इदमुच्यते -

**न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।**
**विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥**

तन्मम एतदद्य पुनर्जन्मदिनमिव सञ्जातम्। इति चिन्तयमानं मकरमाह - "भो मित्र! अर्पय तत् हृदयं यथा ते भातृपत्नी भक्षयित्वा अनशनादुत्तिष्ठति"। अथ विहस्य निर्भर्त्सयन् वानरः तमाह - "धिक् धिक् मूर्ख! विश्वासघातक! किं कस्यचित् हृदयद्वयं भवति ? तदाशु गम्यतां जम्बूवृक्षस्य अधस्तात्, न भूयोऽपि त्वया अत्र आगन्तव्यम्।

# द्वितीयः पाठः

## रामनाममङ्गलमङ्गुलीयकम्

गद्यपद्यमयं साहित्यविभागं चम्पूकाव्यमिति अभिधीयते। 'सुललितं चलति' इति चम्पूपदस्यार्थः। अयं पाठ्यभागः श्रीभोजराजविरचितस्य चम्पूरामायणस्य सुन्दरकाण्डात् सङ्गृहीतः। रामदूतः हनूमान् समुद्रम् उल्लङ्घ्य लङ्कां गत्वा सीताम् अन्विष्य रामाङ्गुलीयकं तस्मै प्रायच्छत्। पश्चात् सीतायाः चूडामणिं स्वीकृत्य रामाय समर्पयितुं ततः प्रस्थितः। एष एव पाठस्यास्य सन्दर्भः।

**ततो हनूमान्दशकण्ठनीतां सीतां विचेतुं पथि चारणानाम्।**
**महेन्द्रशैलस्य खगेन्द्रवेगः प्रस्थादुदस्थात् प्रथमानवेगः॥**

**सरलार्थः -** ततः वानरनायकस्य सुग्रीवस्य आदेशानन्तरम् आञ्जनेयः द्रुतगतिः गरुडसमानवेगः रावणेन अपहृतां सीताम् अन्वेष्टुं गन्धार्वादीनां मार्गे आकाशे गन्तुं महेन्द्रपर्वतस्य शिखरात् उल्लङ्घयामास।

तदनन्तरं दुस्तरं समुद्रम् उल्लङ्घ्य अपरतीरे वर्तमाने लम्बपर्वते अवतीर्य सूक्ष्मशरीरः सन् मारुतिः लङ्कायाः उत्तरद्वारगोपुरे उपविश्य अनन्तचिन्तया आक्रान्तान्तरङ्गः बभूव। वानरसेना अनेकविघ्नोत्पादकं समुद्रम् इमं कथं लङ्घयेत्? यथा कथञ्चित् सागरं तरति चेदपि इमां राक्षसराजधानीं लङ्कां कथं प्राप्नुयात्? सर्वथा श्रीरामस्य सङ्कल्पो व्यर्थो भविष्यति। अहमपि विफलीकृतसमुद्रलङ्घनः अभवम्। जानकी तु जीविता वा न वा इत्यपि अहं न जाने इत्येवं बहुधा विचिन्त्य पूज्यां सीताम् अन्वेष्टुं रहस्यसञ्चारनिमित्तं सूर्यास्तो भवतु इति मारुतिः अभिललाष।

तदनन्तरम् अशोकवाटिकायां नागदन्तक- देववल्लभ- तृणराजाह्वय- श्रीताल- तापिच्छ- आरग्वध- देवदारुविशेष- केसर- अशोक- क्षुरक- तिष्यफल- भिरिमल्लिका- लकुच- जल-पङ्कशोधकबीजवृक्षविशेष-कोशफल- निकोचक- देवकुसुम- स्रुवावृक्ष- तृणद्रुमविशेष- नीपजन्तुफल- दधिफल- चलदल- रक्त-कुरण्टक- पिण्डीतक- चूतविशेष- माध्य- स्फूर्जक- मलयज- तिनिश- हेमपुष्पक- नागकेसर- कष्टकीफल-नीवार-किंशुक-फलेरुह-राजादनादि प्रदुरैः बहुभिः वृक्षवृन्दैः परिपूर्णायाम् अशोक-वाटिकायां सीतादर्शनार्थम् इतस्ततः सञ्चरन् आञ्जनेयः अत्युन्नतभीकरतरुभिः आच्छादिताकाशां काञ्चित् हिरण्मयीम् अगरुविटपीम् आरुरोह। पुनरयं हनूमान् शिंशपावृक्षस्य अधः उपविष्टाम् एतां सीताम् अवलोक्य इत्थं विचारमकरोत्।

**ज्योत्स्नां विनापि निवसन्निशि शीतभानुश्छायां विनापि विलसेद्दिवसेश्वरोऽपि।**

**एनां विना रघुपतिः परिगृह्य धैर्यम् सप्राण एव वसतीति विचित्रमेतत्॥**

**सरलार्थः -** चन्द्रिकां विहाय अपि रात्रौ चन्द्रः निवसेत्। सूर्यः च भार्यां छायां विना विलसेत्। एतन्न विचित्रम्। किन्तु सीतां विना श्रीरामः मनस्स्थैर्यम् अवलम्ब्य सजीवः एव वसतीति अयं विचारः आश्चर्यजनकः।

स आञ्जनेयः च वृक्षात् अवरुह्य तत्कालेऽपि चतुरवचनैः जानकीं समाश्वासयितुं नमस्कुर्वन् एवं विज्ञापनम् अकरोत्। हे सुमङ्गले जानकि ! दुर्निरोधेन त्वद्विरहेण तप्यतः श्रीरामस्य दूतं माम् आञ्जनेयम् अन्यथा अन्यः इति मा चिन्तय।

एवं हनूमद्वचनात् संजातविश्वासेन भयमुक्ता सीता 'कथं भवान् श्रीरामस्य दूतः संजातः' इत्यादिकं प्रश्नं हनूमन्तम् अपृच्छत्। तदा पवनतनयः बालिमरणकारणम्, रामसुग्रीवयोः मैत्रीं च कथयित्वा वाल्मीकिमनः इव निरन्तरसन्निकृष्टेन रामनाम्ना मुद्रितं श्रीरामप्रेषितं मङ्गलं रामाङ्गुलीयकं सीतायै प्रददौ।

ततः सीता रावणस्य हिंसापीऽनादिभिः पिण्डीभूतं स्व क्रोधाग्निं शिरोरत्नं चूडामणिं रामाय दातुं आञ्जनेयाय प्रददौ। तं नमस्कारपूर्वकं चूडामणिं स्वीकृतसर्पसदृशदीर्घबाहुः मारुतिः अशोकवनात् प्रतस्थे।

# तृतीयः पाठः

## प्रयोगाः (कर्तरि, कर्मणि, भावे, कृदन्तप्रयोगाश्च)

### प्रयोगाः त्रिविधाः -

(१) कर्तरि, (२) कर्मणि, (३) भावे इति। धातुः द्विविधः - सकर्म्मकः अकर्म्मकश्च इति। कर्म विद्यते यस्मिन् सः सकर्मकः, कर्म न विद्यते यस्मिन् सः अकर्मकः। सकर्मकधातुभ्यः कर्तरि कर्मणि च इति द्वौ प्रयोगौ भवतः। अकर्मकधातुभ्यः कर्तरि भावे च प्रयोगो भवति।

### कर्तरि प्रयोगः -

**नियमाः -**

कर्तरिप्रयोगे कर्तृपदस्य प्राधान्यं भवति। अस्मिन् प्रयोगे कर्ता सर्वदा प्रथमाविभक्तौ भवति।

कर्मपदं द्वितीयाविभक्त्यन्तं भवति। क्रियापदं कर्तृपदानुसारं भवति। यथा - छात्रः वेदं पठति। अत्र 'छात्रः' इति पदं कर्तृपदं (प्रथमा), 'वेदम्' इति कर्मपदम् (द्वितीया), 'पठति' इति क्रियापदम्। अत्र कर्तृपदानुसारं क्रियापदम् अभवत्।

**उदाहरणानि -**

१.शिष्यः ऋग्वेदं पठति। २.गुरुः उपवासं करोति। ३.कपयः फलं खादन्ति।

**कर्मणिप्रयोगः** -अयं प्रयोगः सकर्मकधातुभ्यः एव सम्भवति। अस्मिन् प्रयोगे कर्मपदं प्रधानं भवति।

**नियमाः -**

कर्मपदं सर्वदा प्रथमाविभक्तौ भवति। कर्तृपदं सर्वदा तृतीयाविभक्तौ भवति। कर्मपदानुसारं क्रियापदं भवति। क्रियापदम् आत्मनेपदे भवति। मूलधातुना सह 'य' इति योज्यते। (पठ्+य+ ते) यथा - छात्रेण वेदः पठ्यते।

**उदाहरणानि -**

१. शिक्षकेण पाठ्यक्रमः लिख्यते। २. बालकेन चन्द्रः अदृश्यत। ३.कपिना फलानि खाद्यन्ते।

### भावेप्रयोगः -

**नियमाः -**

भावेप्रयोगः अकर्मकधातुभ्यः भवति। भावे प्रयोगे क्रियायाः भावः बोध्यते। अस्मिन् प्रयोगे कर्तृपदं तृतीयाविभक्तौ भवति। प्रयोगेऽस्मिन् कर्मपदं न भवति। क्रियापदम् आत्मनेपदान्तं तथा प्रथमपुरुषैकवचनान्तं भवति। यथा - आचार्येण भूयते। त्रिविधप्रयोगेषु कः भेदः इति कोष्ठके पश्यामः -

| प्रयोगः | कर्तृपदम् | कर्मपदम् | क्रियापदम् | प्रधानम् |
|---|---|---|---|---|
| कर्तरि | प्रथमाविभक्त्यन्तम् | द्वितीयाविभक्त्यन्तम् | कर्तृपदानुसारम् | कर्तृपदम् |
| कर्मणि | तृतीयाविभक्त्यन्तम् | प्रथमाविभक्त्यन्तम् | कर्मपदमनुसरति, धातुना सह 'य' योज्यते | कर्मपदम् |
| भावे | तृतियाविभक्त्यन्तम् | न भवति | आत्मनेपदप्रथम-पुरुषैकवचनम् | क्रियापदम् |

उदाहरणानि

| कर्तरि प्रयोगः | | | कर्मणि प्रयोगः | | |
|---|---|---|---|---|---|
| श्वेतकेतुः | ऋग्वेदं | पठति। | श्वेतकेतुना | ऋग्वेदः | पठ्यते। |
| बालकौ | पाठशालां | गमिष्यतः। | बालकाभ्यां | पाठशाला | गम्स्यते। |
| शिशवः | अश्वशकटम् | आरोहन्। | शिशुभिः | अश्वशकटः | आरुह्यत। |
| माता | माम् | आह्वयत्। | मात्रा | अहम् | आहूये। |

| कर्तरि प्रयोगः | भावे प्रयोगः |
|---|---|
| शिशुः स्वपिति। | शिशुना सुप्यते। |
| बालिकाः अहसन्। | बालिकाभिः अहस्यत। |
| त्वं नृत्य। | त्वया नृत्यताम्। |

## कृदन्ताः

कृत् अन्ते यस्य सः कृदन्तः। अयमपि तिङ्प्रत्यय इव धातोः विधीयते। धातोः तिङ्-प्रत्ययेन निष्पन्नं पदं तिङन्तं भवति, धातोः कृत्-प्रत्ययेन तु निष्पन्नं पदं सुबन्तम् इति कथ्यते। "कृत्तद्धितसमासाश्च" इति सूत्रेण अस्य प्रातिपदिकसंज्ञा भवति।

कृत्-प्रत्ययाः विविधाः भवन्ति, यथा - (१) वर्तमानकृदन्तः (२) भूतकृदन्तः (३) विध्यर्थकृदन्तः (४) कृदन्त-अव्ययानि।

### वर्त्तमानकृदन्तः -

#### शतृ-प्रत्ययः

परस्मैपदिधातुभ्यः कर्त्रर्थे शतृ-प्रत्ययः विधीयते। शत्रन्तं पदं पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग-भेदात् विविधं रूपं प्राप्नोति। यथा -

| | | |
|---|---|---|
| पठन् | - | पुंलिङ्गे |
| पठन्ती | - | स्त्रीलिङ्गे |
| पठत् | - | नपुंसकलिङ्गे |

**पुँल्लिङ्गम्**

पठ् धातोः पुँल्लिङ्गे प्रथमाविभक्तौ एकवचने शत्रन्तं रूपं 'पठन्' इति भवति। जुहोत्यादिगणीयान् धातुन् अतिरिच्य अन्येषां सर्वेषां रूपाणि समानानि भवन्ति।

**उदाहरणानि -**

१. बालकः वेदं पठन् अस्ति।

२. नचिकेताः यानं पश्यन् वेदपाठशालां गच्छति।

३. गच्छन्तं बालकं माता पश्यति।

**सप्तसु विभक्तिषु शतृप्रत्यये रूपाणि -**

| विभक्तिः | एक वचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | पठन् | पठन्तौ | पठन्तः |
| **द्वितीया** | पठन्तं | पठन्तौ | पठतः |
| **तृतीया** | पठता | पठद्भ्याम् | पठद्भिः |
| **चतुर्थी** | पठते | पठद्भ्याम् | पठद्भ्यः |
| **पञ्चमी** | पठतः | पठद्भ्याम् | पठद्भ्यः |
| **षष्ठी** | पठतः | पठतोः | पठताम् |
| **सप्तमी** | पठति | पठतोः | पठत्सु |
| **सम्बोधनम्** | हे पठन् ! | हे पठन्तौ! | हे पठन्तः! |

**जुहोत्यदिगणीयस्य दा-धातोः सप्तसु विभक्तिषु शतृप्रत्यये रूपाणि -**

| विभक्तिः | एक वचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | ददत् | ददतौ | ददतः |
| **द्वितीया** | ददतम् | ददतौ | ददतः |
| **तृतीया** | ददता | ददद्भयाम् | ददद्भिः |
| **चतुर्थी** | ददते | ददद्भयाम् | ददद्भ्यः |

| | | | |
|---|---|---|---|
| **पञ्चमी** | ददतः | दद्भ्याम् | दद्भ्यः |
| **षष्ठी** | ददतः | ददतोः | ददताम् |
| **सप्तमी** | ददति | ददतोः | ददत्सु |
| **सम्बोधनम्** | हे ददत्! | हे ददतौ! | हे ददतः! |

## स्त्रीलिङ्गम् -

शत्रान्तानि पदानि स्त्रीलिङ्गे द्विविधं रूपं भजन्ते। न विद्यते रूपेषु काऽपि साम्यता। अधस्तनम् उदाहरणद्वयं पश्यत -

शिष्या पठन्ती अस्ति। बालिका गीतं शृण्वती अस्ति।

उपरि प्रदत्ते उदारणद्वये प्रथमोदाहरणे 'पठन्ती' इत्यत्र 'नुम्' (नकारः) श्रूयते, किन्तु द्वितीये उदाहरणे 'नुम्' (नकारः) न श्रूयते। एवं तर्हि कुत्र नकारः भवेत्, कुत्र नकारः न भवेत् इति कथं जानीयाम?

येषामन्ते 'ति' इति श्रूयते। एतस्मात् 'ति' भागात् पूर्वं यदि ह्रस्व-अकारः श्रुयते तर्हि तत्र तिभागात् पूर्वं नकारः (नुम्) आगच्छति। 'ति' भागात् पूर्वं ह्रस्व-अकारः न श्रूयते चेत् तत्र नकारः (नुम्) न भवति। पुनः यदि तिभागात् पूर्वम् आकारः श्रूयते तर्हि तत्र विकल्पेन नकारः (नुम्) भवति।

**अत्र ध्यातव्यम्** - अवर्णान्तात् शतृ-प्रत्यये परे विकल्पेन नुम् भवति। भ्वादिगणीयेभ्यो दिवादिगणीयेभ्यश्च परे तु नित्यं नुमागमः। जुहोत्यादिगणीयेभ्यो धातुभ्यो नुम् न भवति। यथा -

| | | |
|---|---|---|
| गच्छति | - | गच्छन्ती |
| जानाति | - | जानती/जानन्ती |
| चिनोति | - | चिन्वती |
| करोति | - | कुर्वती |
| लिखति | - | लिखती/लिखन्ती |

**उदाहरणानि -**

१. नर्तकी नृत्यन्ती अस्ति।

२. उपदिशतीं/उपदिशन्तीं मातरं पुत्रः अनुसरति।

३. भोजनं कुर्वत्या बालिकया सह रामः सम्भाषणं करोति।

४. पुष्पं चिन्वत्यै पुत्र्यै माता पुष्पाधानम् अददात्।

## नपुंसकलिङ्गम् -

नपुंसकलिङ्गे शत्रन्तानां रूपाणि पचत्-शब्दस्य रूपाणि इव भवन्ति। प्रथमाद्वितीये इति विभक्तिद्वयं विहाय अन्यासु विभक्तिसु शत्रान्तानां रूपाणि पुँल्लिङ्गरूपवद् भवन्ति।

**उदाहरणानि -**

१. वृक्षात् पर्णं पतत् अस्ति।

२. पुस्तकं नश्यत् खेदं जनयति।

३. प्रवहत् जलं शिशुः पश्यति।

## शानच्-प्रत्ययः -

शानच्-प्रत्ययः आत्मनेपदिभ्यो धातुभ्यो भवति। शानच्-प्रत्यये 'आन' इत्यंशः अवशिष्यते। शानच्-प्रत्ययान्त-शब्दस्य द्विविधं रूपं भवति। एकत्र मकारः (मुक्) श्रूयते, अपरत्र मकारः (मुक्) न श्रूयते। कुत्र मकारः श्रूयते, कुत्र मकारः न श्रूयते इति पश्यामः।

वर्धते, वर्तते, शेते, भुङ्क्ते इत्यादीनि लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपाणि। यत्र 'ते' इत्यस्मात् परम् अकारः श्रूयते तत्र 'ते' इत्यस्मात् पूर्वं मकाराः (मुक्) भवति।

यथा - वर्धते = वर्ध + ते + आन = वर्ध + म् + आन = वर्धमान

यत्र 'ते' इत्यस्मात् पूर्वम् अकारभिन्नः वर्णः श्रूयते तत्र मकारः (मुक्) न भवति। तत्र लट्-लकार-प्रथमपुरुषद्विवचने यत् रूपं तत्र 'ते' इत्यस्य स्थाने नकारो योजनीयः।

यथा - शयाते = शया + ते = शयान

शानच्-प्रत्ययान्तस्य पुँल्लिङ्गे रामशब्दरूपवत्, स्त्रीलिङ्गे लताशब्दरूपवत्, नपुंसि च फलशब्दरूपवत् रूपं चलति।

**उदाहरणानि -**

१. वेदं पठतः छात्रस्य बुद्धिः वर्धमाना अस्ति।

२. शयानं शिशुं माता उत्थापयति।

३. उड्डीयमानेन विमानेन पिता देहलीं गच्छति।

## भूतकृदन्तः

### क्त प्रत्ययः -

**निष्ठा** *(पा.सू. ३.२.१०२)*

अतीतकालार्थे धातोः क्त-प्रत्ययः भवति। अयं प्रत्ययः कर्मणि भावे च भवति। **यथा - कर्मणि** - सः मोदकम् अखादत् = तेन मोदकम् खादितम्। अत्र सः इति कर्ता तृतीयाविभक्तौ अभवत्। मोदकम् इति कर्मानुसारं खादितम् इति क्रियापदम् अभवत्। मोदकम् इति नपुंसकलिङ्गे प्रथमाविभक्तौ एकवचने अस्ति, अतः खादितम् इत्यपि नपुंसकलिङ्गे प्रथमाविभक्तौ एकवचने अभवत्।

**भावे** - देवदत्तः अशेत = देवदत्तेन शयितम्। भावे तु क्त-प्रत्ययान्तं पदं नित्यनपुंसके एकवचने भवति।

**कर्मणि -**

१. सः व्याघ्रम् अपश्यत् = तेन व्याघ्रः दृष्टः। तेन व्याघ्रौ दृष्टौ। तेन व्याघ्राः दृष्टाः।

२. यूयं पुस्तकम् अपठत = युष्माभिः पुस्तकं पठितम्। युष्माभिः पुस्तके पठिते। युष्माभिः पुस्तकानि पठितानि।

३. विद्वान् ग्रन्थान् अलिखत् = विदुषा ग्रन्थाः लिखिताः।

## क्तवतु-प्रत्ययः

**निष्ठा** *(पा.सू. ३.२.१०२)*

अतीतकालार्थे धातोः क्तवतु प्रत्ययो भवति। अस्य प्रत्ययस्य केवलं कर्तरि प्रयोगो भवति। यथा - शिशुः मोदकम् अखादत्। शिशुः मोदकं खादितवान्। पुंलिङ्गे - तवान्, स्त्रीलिङ्गे - तवती, नपुंसकलिङ्गे - तवत् इति शेषः तिष्ठति। यथा - पुंलिङ्गे - खादितवान्, स्त्रीलिङ्गे - खादितवती, नपुंसकलिङ्गे - खादितवत्।

**उदाहरणानि -**

**पुंलिङ्गे**

१. अहं भवतां लेखं दृष्टवान्।

२. बालकौ गीतवन्तौ।

३. ते गृहकार्यं कृतवन्तः।

**स्त्रीलिङ्गे**

१. बालिका गीतवती।

२. ते मातरं स्मृतवत्यौ।

३. बालिकाः गृहकार्यं कृतवत्यः।

**नपुंसकलिङ्गे**

१. लोकयानं गतवत्।

२. पुष्पे विकसितवती।

३. विमानानि उड्डयितवन्ति।

## विध्यर्थकृदन्तः

### 'तव्यत्/अनीयर्' प्रत्ययौ

**तव्यत्तव्यानीयरः** *(पा.सू.३.१.९६)*

उचितार्थे गम्यमाने धातोः तव्यत्/तव्य/अनीयर् प्रत्यया भवन्ति। एते प्रत्ययाः कर्मार्थे भावार्थे विधीयन्ते। **कर्मार्थे यथा** - भवान् विद्यालयं गच्छेत्। भवता विद्यालयः गन्तव्यः/गमनीयः। **भावार्थे यथा** - सः भवेत्। तेन भवितव्यम्/भवनीयम्। भवान् हसेत्। भवता हसितव्यम्/हसनीयम्।

**उदाहरणानि -**

(१) सः ग्रन्थं पठेत्। तेन ग्रन्थः पठितव्यः/पठनीयः। तेन ग्रन्थौ पठितव्यौ/ पठनीयौ। तेन ग्रन्थाः पठितव्याः/पठनीयाः।

(२) बालिका उद्यानात् पुष्पम् आनयेत्। बालिकया उद्यानात् पुष्पम् आनेतव्यम्/आनयनीयम्। बालिकया पुष्पे आनेतव्ये/आनयनीये। बालिकया पुष्पाणि आनेतव्यानि/आनयनीयानि।

### 'क्त्वा' प्रत्ययः -

**समानकर्तृकयोः पूर्वकाले** *(पा.सू.३.४.२१)*

यत्र वाक्ये क्रियाद्वयं भवति। कर्ता समानो वर्तते। विद्यमाने क्रियाद्वये या क्रिया पूर्वं भवति तत्र क्त्वा प्रत्ययः भवति। **यथा** - देवदत्तः खादति, देवदत्तः विद्यालयं गच्छति। देवदत्तः खादित्वा विद्यालयं गच्छति। अत्र वाक्ये देवदत्त इति समानः कर्ता अस्ति। क्रियाद्वयम् अपि अस्ति खादति गच्छति च। तत्र खादनक्रिया पूर्वं भवति, अनन्तरं गमनक्रिया भवति। अतः खादति इत्यस्मात् क्त्वा प्रत्ययः भवति।

**अत्र ध्यातव्यम् - समासेऽनञ्पूर्वे क्त्वो ल्यप्** *(पा.सू. ७.१.३७)* - अव्ययपूर्वपदेऽनञ्समासे क्त्वा-प्रत्ययस्य स्थाने ल्यबादेशो भवति। यथा - आगम्य (आङ् + गम् + ल्यप्)। शिष्यः उपविश्य वेदम् अधीते। गुरुः उत्थाय उपदेशं ददाति।

**उदाहरणानि -**

१. पिता मध्याह्ने भुङ्क्ते। विश्राम्यति। पिता मध्याह्ने भुक्त्वा विश्राम्यति।

२. शिशुः पयः पिबति। निद्राति। शिशुः पयः पीत्वा निद्राति।

३. बालकाः अक्रीडन्। गृहं प्रविष्टवन्तः। बालकाः क्रीडित्वा गृहं प्रविष्टवन्तः।

## ‘तुमुन्’ प्रत्ययः -

**तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्** *(पा.सू.३.३.१०)*

यस्मिन् वाक्ये क्रियाद्वयं भवति कर्ता च समानो भवति, तत्र क्रियाद्वये या क्रिया अपरक्रियायाः निमित्तं भवति, तया क्रियया सह तुमुन् प्रत्ययो भवति। **यथा** - देवदत्तः भोजनं करोति। देवदत्तः भोजनालयं गच्छति। देवदत्तः भोजनं कर्तुं भोजनालयं गच्छति। अत्र वाक्ये देवदत्त इति कर्ता समानोऽस्ति। भोजनकरणं गमनं च इति क्रियाद्वयम् अस्ति। अत एव निमित्तभूता भोजनक्रियया सह तुमुन् प्रत्ययोऽभवत्।

**उदाहरणानि -**

(१) सः पठति। विद्यालयं गच्छति । सः पठितुं विद्यालयं गच्छति।

(२) भक्ताः देवं पश्यन्ति। मन्दिरं गच्छन्ति। भक्ताः देवं द्रष्टुं मन्दिरं गच्छन्ति।

(३) वयं ज्ञानं प्राप्नुमः। अध्ययनं कुर्मः। वयं ज्ञानं प्राप्तुम् अध्ययनं कुर्मः।

**विविधधातूनां कृत्-प्रत्ययेषु पुंलिङ्गे रूपम् -**

| धातुः | क्त | क्तवतु | तुमुन् | क्त्वा/ल्यप् | तव्यत् | अनीयर् |
|---|---|---|---|---|---|---|
| **गम्** | गतः | गतवान् | गन्तुम् | गत्वा | गन्तव्यः | गमनीयः |
| **पठ्** | पठितः | पठितवान् | पठितुम् | पठित्वा | पठितव्यः | पठनीयः |
| **लिख्** | लिखितः | लिखितवान् | लेखितुम् | लिखित्वा | लेखितव्यः | लेखनीयः |
| **पा** | पीतः | पीतवान् | पातुम् | पीत्वा | पातव्यः | पानीयः |
| **नी** | नीतः | नीतवान् | नेतुम् | नीत्वा | नेतव्यः | नयनीयः |
| **नृत्** | नृत्तः | नृत्तवान् | नर्तितुम् | नर्तित्वा | नर्तितव्यः | नर्तनीयः |
| **ह्वेञ्** | आहूतः | आहूतवान् | आह्वातुम् | आहूय | आह्वातव्यः | आह्वानीयः |
| **प्रच्छ्** | पृष्टः | पृष्टवान् | प्रष्टुम् | पृष्ट्वा | प्रष्टव्यः | प्रच्छनीयः |
| **कृ** | कृतः | कृतवान् | कर्तुम् | कृत्वा | कर्तव्यः | करणीयः |
| **ज्ञा** | ज्ञातः | ज्ञातवान् | ज्ञातुम् | ज्ञात्वा | ज्ञातव्यः | ज्ञानीयः |

# चतुर्थः पाठः

## स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्

प्रस्तुतोऽयमंशः वैदिकवाङ्मये अद्वितीयस्थानवत्याः तैत्तिरीयोपनिषदः एकादशानुवाकस्य शिक्षावल्लीतः उद्धृतोऽस्ति। उपनिपूर्वकात् 'षद्लृ विशरणगत्यवसादनेषु' इत्यस्माद्धातोः क्विप्रत्ययेन 'उपनिषद्' इति पदं निष्पद्यते। यस्यार्थो भवति गुरोः समीपे सविनयम् उपस्थितिः। अस्यां गुरुपरम्परायाम् अध्ययनानन्तरम् आचार्येण शिष्येभ्यः जीवनोपयोगी अयमुपदेशः प्रदत्तः।

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनम् आहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्॥१॥

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि॥२॥

नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्॥३॥

ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। एष आदेश। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्॥४॥

# पञ्चमः पाठः

## अथ प्रत्यय-प्रकरणम्

प्रत्याययति ज्ञापयति बोधयति वा प्रकृत्यर्थान् सः प्रत्ययः। प्रति इत्युपसर्गपूर्वकाद् णिजन्तात् 'इण् गतौ' धातोः भावे करणे वार्थे अच्-प्रत्यये, प्रत्ययः इति शब्दो निष्पद्यते। प्रकृत्या सह प्रत्ययः मिलित्वा अर्थपरिवर्तनं जनयति। प्रत्ययाः सामान्यतया द्विविधा भवन्ति। यथा- प्रातिपदिकेभ्यो विहाताः (सुप्, स्त्री, तद्धितः), धातुभ्यो विहिताः (तिङ्, कृत्)।

### १. सुप्-प्रत्ययाः

**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** *(पा.सू. ४.१.२)*

**वृत्तिः** - सु-औ-जश्-अम्-औट्-शस्-टा-भ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि-भ्याम्-भ्यस्-ङस्-ओस्-आम्-ङि-ओस्-सुप् इमे स्वादयः एकविंशतिः प्रत्ययाः प्रातिपदिकेभ्यो विधीयन्ते।

### २. स्त्रीप्रत्ययाः

संस्कृतभाषायां प्रातिपदिकात् स्त्रीत्वबोधनाय केचन प्रत्ययाः कल्पिताः सन्ति। ते च - टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति इति एते अष्टौ प्रत्ययाः स्त्रीत्वबोधनाय प्रातिपदिकात् भवन्ति।

### टाप् प्रत्ययः

**अजाद्यतष्टाप्** *(पा.सू. ४.१.४)*

**वृत्तिः -** अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप्स्यात्।

**उदाहरणानि-**

| | | |
|---|---|---|
| अज + टाप् = अजा | अश्व + टाप् = अश्वा | बाल + टाप् = बाला |
| मूषक + टाप् = मूषिका | चटक + टाप् = चटका | वत्स + टाप् = वत्सा |

### ङीप् प्रत्ययः

**टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः** *(पा.सू. ४.१.१५)*

**वृत्तिः -** अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप्स्यात्।

**उदाहरणानि -** कुरुचरी (ट)। सौपर्णेयी (अण्)। औत्सी (अञ्)। ऊरद्वयसी (द्वयसच्)। ऊरुदघ्नी (दघ्नच्)। ऊरुमात्री (मात्रच्)। पञ्चतयी (तयप्)। आक्षिकी (ठक्)। लावणिकी (ठञ्)। यादृशी (कञ्)। इत्वरी (क्वरप्)। (नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्) - स्त्रैणी (नञ्)। पौंस्नी (स्नञ्)। शाक्तिकी (ईकक्)। याष्टीकी (ईकक्)। आढ्यङ्करणी (ख्युन्)। तरुणी। तलुनी।

**उगितश्च** *(पा.सू. ४.१.४)*

**वृत्तिः** - उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात्।

उदाहरणानि- भवत् + ङीप् = भवन्ती श्रीमत् + ङीप् = श्रीमती

पचत् + ङीप् = पचन्ती आयुष्मत् + ङीप् = आयुष्मती

गच्छत् + ङीप् = गच्छन्ती बुद्धिमत् + ङीप् = बुद्धिमती

**ङीष् प्रत्ययः**

**षिद्गौरादिभ्यश्च** *(पा.सू. ४.१.४१)*

**वृत्तिः** - षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष् स्यात्।

**उदागरणानि-**

| ङीष् प्रत्ययः | |
|---|---|
| **नर्तक + ङीष् = नर्तकी** | अनडुह् + ङीष् = अनडुही |
| **खनक + ङीष् = खनकी** | गार्ग्यायण् + ङीष् = गार्ग्यायणी |

**ङीप् प्रत्ययः**

**वयसि प्रथमे** *(पा.सू. ४.१.२०)*

**वृत्तिः** - प्रथमो वयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात्। कुमारी।

**ङीष् प्रत्ययः**

**जातेरस्त्रीविषयादयोपधात्** (*पा.सू. ४.१.६३*)

**वृत्तिः** - जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्। कटी। वृषली। कठी। बह्वृची। जातेः किम्? मुण्डा। अस्त्रीविषयात् किम्? बलाका। अयोपधात्किम्? क्षत्रिया।

**ङीन् प्रत्ययः**

**शार्ङ्गरवाद्यञो ङीन्** (*पा.सू. ४.१.७३* )

**वृत्तिः** - शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। बैदी। ब्राह्मणी। नृरनरयोर्वृद्धिश्च (वार्तिकम्)। नारी।

**उदाहरणानि-** शार्ङ्गरव + ङीन् = शार्ङ्गरवी ब्राह्मण + ङीन् = ब्राह्मणी

**ति प्रत्ययः**

**यूनस्तिः** *(पा.सू. ४.१.७७)*

**वृत्तिः** - युवञ्छब्दात् स्त्रियां तिः प्रत्ययः स्यात्। युवतिः

**उदाहरणम्** - युवन् + ति = युवतिः।

## ३. तद्धितप्रत्ययाः -

एतेऽपि प्रातिपदिकेभ्यो विधीयन्ते। एतत्प्रत्ययान्ताः शब्दाः "कृत्तद्धितसमासाश्च" इत्यनेन सूत्रेण प्रादिपदिकसंज्ञां लभन्ते। ते च यथा - अण्, ढक्, घ, ख, ठञ्, मतुप्, तमप्, इष्ठन्, तरप्, ईयसुन्।

### अण् प्रत्ययः

**प्राग्दीव्यतोऽण्** *(पा.सू. ४.१.८३)*

**वृत्तिः** - प्राग्दीव्यतीयेष्वर्थेषु समर्थेभ्यः प्रथमाद् अण् प्रत्ययो भवति औत्सर्गिकरूपेण। अधिकारसूत्रमिदम्। **उदाहरणानि** - गुरोः इदम् = गुरु + अण् = गौरवम्। सूर्ये जातः = सूर्य + अण् = सौरः। उपगोः अपत्यम् = उपगु + अण् = औपगवः। पर्वतस्य अपत्यं स्त्री = पर्वत + अण् = पार्वती। गङ्गायाः अपत्यं पुमान् = गङ्गा + अण् = **गाङ्गः**। पृथायाः अपत्यं पुमान् = पृथु + अण् = पार्थः

### ढक् प्रत्ययः

**स्त्रीभ्यो ढक्** *(पा.सू. ४.१.१२०)*

**वृत्तिः** - स्त्रीप्रत्ययान्तेभ्यो ढक् प्रत्ययः स्यात्। वैनतेयः।

**उदाहरणम्** - विनतायाः अपत्यं पुमान् = विनता+ढक् = वैनतेयः। कुन्त्याः अपत्यं पुमान् = कुन्ती+ढक् = कौन्तेयः। कद्र्वाः अपत्यं पुमान् = कद्रू+ढक् = काद्रवेयः।

### घखौ प्रत्ययौ

**राष्ट्रावारपाराद् घखौ** *(पा.सू. ४.२.९३)*

**वृत्तिः** - आभ्यां क्रमाद् घखौ स्त शेषे। राष्ट्रे जातादिः राष्ट्रियः। अवारपारीणः। 'अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्। (वार्तिकम्)। अवारीणः। पारीणः। पारावारीणः।

**उदाहरणानि** - राष्ट्र + घ = राष्ट्रियः। अवारपार + ख = अवारपारीणः। अवारीण। पारीणः। पारावारीणः

**कालाट्ठञ्** *(पा.सू. ४.३.११)*

**वृत्तिः** - कालवाचिभ्यष्ठञ् स्यात्। कालिकम्। मासिकम्। सांवत्सरिकम्। अव्ययानां भमात्रे टिलोपः (वार्तिकम्)। सायंप्रातिकः। पौनःपुनिकः।

**उदाहरणानि** - मास+ठञ् = मासिकम्। वत्सर+ठञ् = वात्सरिकम्। प्रातःकाल+ठञ् = प्रातःकालिकम्।

## मतुप् प्रत्ययः

**तदस्यास्त्यस्मिन्निति मतुप्** *(पा.सू. ५.२.९४)*

**वृत्तिः** - प्रथमान्तादस्यास्तीत्यर्थेऽस्मिन्नस्ति इत्यर्थे च मतुप् प्रत्ययः स्यात्।

**उदाहरणानि** - गावः अस्य अस्मिन् वा सन्ति सः गोमान्। बुद्धिः अस्य अस्मिन् वा अस्ति सः बुद्धिमान्। ज्ञानम् अस्य अस्मिन् वा अस्ति सः ज्ञानवान्।

| | पुँल्लिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| गो | गोमान् | गोमन्तौ | गोमन्तः | गोमती | गोमत्यौ | गोमत्यः | गोमत् | गोमती | गोमन्ति |
| रूप | रूपवान् | रूपवन्तौ | रूपवन्तः | रूपवती | रूपवत्यौ | रूपवत्यः | रूपवत् | रूपवती | रूपवन्ति |
| श्री | श्रीमान् | श्रीमन्तौ | श्रीमन्तः | श्रीमती | श्रीमत्यौ | श्रीमत्यः | श्रीमत् | श्रीमती | श्रीमन्ति |

## तमप् इष्ठन् च प्रत्ययौ

**अतिशायने तमबिष्ठनौ** *(पा.सू. ५.३.५५)*

**वृत्तिः** - अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशयेनाढ्यः आढ्यतमः। लघुतमः, लघिष्ठः।

**उदाहरणानि** - अयम् एषु अतिशयेन प्रशस्यः = प्रशस्यतमः। अयम् एषु अतिशयेन प्रशस्यः = श्रेष्ठः।

| | पुँल्लिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| मृदु | मृदुतमः | मृदुतमौ | मृदुतमाः | मृदुतमा | मृदुतमे | मृदुतमाः | मृदुतमम् | मृदुतमे | मृदुतमानि |
| ह्रस्व | ह्रस्वतमः | ह्रस्वतमौ | ह्रस्वतमाः | ह्रस्वतमा | ह्रस्वतमे | ह्रस्वतमाः | ह्रस्वतमम् | ह्रस्वतमे | ह्रस्वतमानि |
| निम्न | निम्नतमः | निम्नतमौ | निम्नतमाः | निम्नतमा | निम्नतमे | निम्नतमाः | निम्नतमम् | निम्नतमे | निम्नतमानि |

## तरप् ईयसुन् च प्रत्ययौ

**द्विवचनविभज्योपपदे तरबीयसुनौ** *(पा.सू. ५.३.५७)*

**वृत्तिः** - द्वयोरेकस्याऽतिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुः लघुतरो लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः।

**उदाहरणानि - तरप्** - अयमनयोः अतिशयेन प्रशस्यः = प्रशस्यतरः। **ईयसुन्** - अयमनयोरतिशयेन प्रशस्यः = श्रेयान्।

| | पुँल्लिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| पटु | पटुतरः | पटुतरौ | पटुतराः | पटुतरा | पटुतरे | पटुतराः | पटुतरम् | पटुतरे | पटुतराणि |
| लघु | लघुतरः | लघुतरौ | लघुतराः | लघुतरा | लघुतरे | लघुतराः | लघुतरम् | लघुतरे | लघुतराणि |
| उच्च | उच्चतरः | उच्चतरौ | उच्चतराः | उच्चतरा | उच्चतरे | उच्चतराः | उच्चतरम् | उच्चतरे | उच्चतराणि |

## ४. तिङ्-प्रत्ययाः

**तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्** *(पा.सू. ३.४.७८)*

**वृत्तिः** - एतेऽष्टादश लादेशाः स्युः। तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् एते अष्टादश तिङ्-प्रत्ययाः धातुभ्यो विधीयन्ते।

## ५. कृत्-प्रत्ययाः -

एते प्रत्ययाः धातुभ्यो विधीयन्ते। तिङ्-प्रत्ययेभ्यो भिन्नाः कृत्-प्रत्ययाः। **यथा** - ण्वुल्, तृच्, अच्, अण्, ण्यत्, यत्, ल्युट्, क्तिन्, घञ्, शतृ, शानच्, क्त्वा, क्तवतु, ल्यप्, तुमुन्, तव्यत्, अनीयर, इत्यादयः।

### ण्वुल् तृच् च प्रत्ययौ

**ण्वुल्तृचौ** *(पा.सू. ३.१.१३३)*

**वृत्तिः** - धातोरेतौ स्तः। कर्तरि कृदिति कर्त्रर्थे।

**उदाहरणानि** - कृ + ण्वुल् (अक) = कारकः। कृ + तृच् (तृ) = कर्ता। हृ + ण्वुल् (अक) = हारकः। हृ + तृच् (तृ) = हर्ता। लिख् + ण्वुल् (अक) = लेखकः। लिख् + तृच् (तृ) = लेखिता।

### अण् प्रत्ययः

**कर्मण्यण्** *(पा.सू. ३.२.१)*

**वृत्तिः** - कर्मण्युपपदे धातोरण् प्रत्ययः स्यात्। उपपदसमासः।

**उदाहरणानि** - कुम्भं करोतीति कुम्भकारः। सूत्रं करोतीति सूत्रकारः।

### ल्युट् प्रत्ययः

**ल्युट् च** *(पा.सू. ३.३.११५)*

**वृत्तिः** - नपुंसकलिङ्गे भावे धातोः ल्युट् प्रत्ययः स्यात्।

**उदाहरणानि** - हस्+ल्युट् (अन) = हसनम्। भुज्+ल्युट् = भोजनम्। शी+ल्युट् = शयनम्।

## षष्ठः पाठः

# हितं मनोहारि च दुर्लभं वचः

महाकविः भारविः संस्कृतप्रौढकविषु अन्यतमः। एष महाकविः 'किरातार्जुनीयम्' इति काव्यं रचयामास। प्रस्तुतपाठ्यभागः किरातार्जुनीयस्य प्रथमसर्गात् केचिच्छ्लोकाः सङ्गृहीताः।

महाकविभारविणा महाभारतकथाम् आश्रित्य अष्टादशसर्गात्मकं (१८) वीररसप्रधानं विरचिदमिदं महाकाव्यम्। अर्थगाम्भीर्ययुक्तं बृहत्त्रय्यां प्रथमपरिगणितं 'किरातार्जुनीयम्' नाम एकमेव महाकाव्यं

समुपलभ्यते। अस्य ग्रन्थस्य शुभारम्भः 'श्री'शब्देन, सर्गान्तः 'लक्ष्मी'शब्देन च भवति। अत्र अर्जुनस्य किरातवेषधारिणा शङ्करेण सह युद्धं वर्णितम्। अत एव ग्रन्थस्य नामकरणं कृतं 'किरातार्जुनीयम इति। अर्जुनाय दिव्यास्त्राणां प्राप्तिरेव महाकाव्यस्य फलम्। अतः ग्रन्थस्यास्य नायकः अर्जुनः नायिका च द्रौपदी वर्तते। महाभारतस्य अष्टादशपर्वेषु वनपर्वणि किरातार्जुनीयस्य कथा विद्यते।

**१. श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**
**स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥१॥**

**अन्वयः** - कुरूणाम् अधीपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्त वर्णिलिङ्गी स वनेचरः विदितः द्वैतवने युधिष्ठिरं समाययौ।

**भावार्थः** - कौरवाणां राज्ञः दुर्योधनेन द्यूतक्रीडायां विजितः सन् राज्यभ्रष्टो धर्मराजो युधिष्ठिरो द्वैतवने न्यवसत्। युधिष्ठिरः दुर्योधनस्य प्रजापालननीतिं विज्ञातुं वनेचरं (गुप्तचरं) नियुक्तवान्। ब्रह्मचारिवेषधारी स वनेचरः दुर्योधनस्य सर्वं वृत्तान्तं विदित्वा द्वैतवने युधिष्ठिरस्य समीपं प्रत्यागच्छत्।

**२. कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।**
**न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥२॥**

**अन्वयः** - कृतप्रणामस्य सपत्नेन जितां महीं महीभुजे निवेदयिष्यतः, तस्य मनः न विव्यथे हि हितैषीणः मृषा प्रियं प्रवक्तुं न इच्छन्ति।

**भावार्थः** - दुर्योधनस्य विदितवृत्तान्तो वनेचरः युधिष्ठिरं प्रणम्य यथा आसीत् तथा विवृणोति, तत्र तस्य मनः व्यथितं न बभूव, यतो हि हितैषिणो जनाः सर्वदा सत्यमेव वदन्ति, ते कदापि मिथ्या प्रियं वक्तुं नैव प्रभवन्ति।

**३. स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किम्प्रभुः।**
**सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥५॥**

**अन्वयः** - यः अधिपं साधु न शास्ति स किंसखा यः हितात् न संश्रृणुते सः किम्प्रभुः हि नृपेषु अमात्येषु च अनुकूलेषु सर्वसम्पदः सदा रतिं कुर्वते।

**भावार्थः** - यः स्वामिनं साधु न उपदिशति सः कुत्सितः सखा, यश्च स्वामी हितैषीणः सेवकात् सम्यक् न श्रृणोति सः कुत्सितः स्वामी वर्तते, यतो हि अमात्यनृपयोः परस्परमनुकूलयोः सतोः सर्वाः सम्पत्तयः सदा अनुकूलाः भवन्ति।

**४. व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः॥३०॥**

**अन्वयः** - ते मूढधियः पराभवं व्रजन्ति ये मायाविषु मायिनः न भवन्ति शठाः तथाविधान् असंवृताङ्गान् निशिता इषवः इव प्रविश्य घ्नन्ति हि।

**भावार्थः** - ये जनाः शठे शाठ्यं समाचरेत् इति नीतिं न जानन्ति ते शठैः निहिताः तिष्ठन्ति, वस्तुतः कुटिलेषु आर्जवं न नीतिः।

५. **गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।**
**परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥३१॥**

**अन्वयः** - अनुरक्तसाधनः कुलाभिमानी त्वत् अन्यः कः इव नराधिपः गुणानुरक्तां कुलजां मनोरमां श्रियम् आत्मवधूम् इव परैः अपहारयेत्।

**भावार्थः** - द्रौपदी कथयति यत्, जगत्यस्मिन् त्वदन्यः न कोऽपि विद्यते, यो हि विविध-विशिष्टगुणयुक्तां श्रियं(लक्ष्मीं) स्वप्रियतमामिव वधूं शत्रुभिः अपहारयेत्।

६. **विहाय शान्तिं नृप ! धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् ।**
**व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥४२॥**

**अन्वयः** - नृप ! शान्तिं विहाय तत् धाम विद्विषां वधाय पुनः सन्धेहि प्रसीद, निःस्पृहाः मुनयः शत्रून् अवधूय शमेन सिद्धिं व्रजन्ति भूभृतः तु न।

**भावार्थः** - द्रौपदी कथयति - हे नृप! यथा निष्कामा मुनयः शत्रून् विजित्य शान्त्या सिद्धिं प्राप्नुवन्ति, तथा भवान् अपि शान्तिं त्यक्त्वा तेजसा शत्रूणां वधार्थं सन्नद्धो भवतु।

# सप्तमः पाठः

## सुभाषितम्

**विद्या ददाति विनयं विनयाद्याति पात्रताम् ।**

**पात्रत्वाद् धनमाप्नोति धनाद्धर्मं ततः सुखम्॥**

**भावार्थः -** विद्या अस्मभ्यं विनयं ददाति, विनयेन वयं योग्यतां प्राप्नुमः योग्यतया वयं धनं प्राप्नुमः। धनात् धर्मं प्राप्नुमः (धनेन धर्माचरणसामर्थ्यं भवति) धर्मात् सुखं प्राप्नुमः।

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**

**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च॥**

**भावार्थः -** जलस्य बिन्दूनां क्रमशः पतनेन यथा घटः पूर्णो भवति तथैव स्वल्पेन अभ्यासेन आचरणेन सङ्ग्रहणेन च वयं विद्यां धर्मं धनं च सम्पादयितुं शक्नुमः।

**प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्ननिहता विरमन्ति मध्याः।**

**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति॥**

**भावार्थः -** उत्तममध्यमाधमभेदेन यथा पुरुषाः त्रिविधाः भवन्ति। तथा तेषां कार्याणां स्वरूपाण्यपि त्रिविधानि विद्यन्ते। उत्तमः पुरुषः मनस्वी विद्वान् अविगणय्य कार्यपूर्णतां भजते। मध्यमः कार्यं प्रारभ्यापि तस्य दुष्करतामनुभवन् मध्ये एव कार्यं त्यजति, कार्यात्पराङ्ऽमुखो भवति। अधमः विघ्नसम्भवभीत्या कार्यारम्भमेव न करोति।

**दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन्।**

**मणिना भूषितः सर्पः किमसौ न भयङ्करः॥**

**भावार्थः -** सर्पस्य शिरसि मूल्यवत् रत्नं भवति। तथापि प्राणान्तकं विषं भवतीति हेतोः सर्पः भयङ्करः। अतः वयं सर्पाद् दूरे भवामः। एवमेव महत्त्वपूर्णविद्या कस्यचित् समीपे भवति चेदपि प्राणान्तकाः नीचाः गुणाः भवन्ति इति हेतोः सः दुर्जनः भयङ्करः। अतः तस्मादपि अस्माभिर्दूरे भाव्यम्।

**आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमुपैति पश्चात्।**

**दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलु सज्जनानाम्॥**

**भावार्थः -** प्रातःकालिकी छाया सुदीर्घा भवति। मध्याह्नपर्यन्तं क्रमशः ह्रस्वा भवति। मध्याह्नकालिकी छाया ह्रस्वा भवति। सायङ्कालपर्यन्तं क्रमशः दीर्घा भवति। एवमेव दुर्जनयोः मध्ये मैत्री प्रारम्भसमये

गहना भवति। काले गच्छति सति शिथिला भवति। सज्जनयोः मध्ये मैत्री चेदारम्भे साधारणा भवति। काले गच्छति सति विशिष्टा भवति।

**निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीस्समाविशतु गच्छतु वा यथेष्टम्।**

**अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥**

**भावार्थः -** नीतिविदः निन्दां कुर्वन्तु अथवा स्तुवन्तु, लक्ष्मीः आगच्छतु वा स्वेच्छानुसारं गच्छतु, मृत्युः युगान्तरे अद्यैव वा समाविशतु तथापि धीराः पुरुषाः न्याय्यात् मार्गात् एकं चरणमपि न च्यवन्ते।

**भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्भूरिविलम्बितो घनाः।**

**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥**

**भावार्थः -** यथा फलवन्तः वृक्षाः फलभारेण नम्रा भवन्ति, जलपूर्णा मेघा अपि पृथिव्यां वर्षन्ति। तथैव सज्जनाः समृद्धिशालिनः सन्तोऽपि नम्राः सहृदयाश्च भवन्ति, यतो लोकोपकार एव तेषां स्वभावसिद्धो धर्मः।

# अष्टम- पाठः

## शुकनासोपदेशसारः

गद्यकाव्यनिर्माणपरम्परायां बाणभट्टः तद्विरचिता **कादम्बरी** च गद्यकाव्येषु महत्वपूर्णं स्थानं बिभर्ति। महाकविः बाणभट्टः कान्यकुब्जेश्वरस्य हर्षवर्धनस्य समकालिकः आसीत्। स तस्य सभायाः सभापण्डित आसीत्। कादम्बरी नाम श्रृङ्गाररसरूपी मदिरा। तथोक्तं बाणभट्टेन -"कादम्बरीरसभरेण समस्त एव मत्तो न किञ्चिदपि चेतयते जनोऽयम्" इति। एतस्य ग्रन्थस्य पूर्वभागं निर्माय कविः बाणभट्टः दिवङ्गतः। तदा तत्पुत्रः भूषणभट्टः अस्य उत्तरभागं रचयामास। कादम्बर्याः कथाभागस्य एकः अंशः **शुकनासोपदेशः** अत्र प्रतिपाद्यमानो विषयः।

एवं समतिक्रामत्सु दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुप-करण-सम्भारसङ्ग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकं च तं कदाचिद् दर्शनार्थमागतमा-रूढविनयमपि विनीततरमिच्छन् कर्तुं शुकनासः सविस्तरमुवाच

तात! चन्द्रापीड! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवातिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। अप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति, इत्यतः विस्तरेणाभिधीयसे।

गर्भेश्वरत्वमभिनवयौवनत्वम्, अप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालन–निर्मलापि कालुष्यमुपयाति बुद्धिः। नाशयति च पुरुषमत्यासङ्गो विषयेषु।

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः। राजवचनमनुगच्छति जनो भयात्। उपदिश्यमानमपि ते न श्रृण्वन्ति। श्रृण्वन्तोऽपि च गजनिमीलितेन अवधीरयन्तः खेदयन्ति शब्दादयिनो गुरून् । अहङ्कार-दाहज्वर-मूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः, अलीकाभिमानोन्मादकारीणि धनानि, राज्यविषविकारतन्द्रीप्रदा राजलक्ष्मीः ।

आलोकयतु तावत् कल्याणाभिनिवेशीं लक्ष्मीमेव प्रथमम्। न ह्येवं विधमपरिचितमिह जगति। न किञ्चिदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। परिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं

गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमवबुध्यते। पश्यति एवं नश्यति। सरस्वतीपरिगृहीतं नालिङ्गति जनम्। गुणवन्तं न स्पृशति। सुजनं न पश्यति। शूरं कण्टकमिव परिहरति। दातारं दुःस्वप्नमिव न स्मरति। विनीतं नोपसर्पति। तृष्णां संवर्धयति। लघिमानमापादयति। एवं विधायापि चानया कथमपि दैववशेन परिगृहीता विक्लवाः भवन्ति राजानः, सर्वाविनयाधिष्ठानतां च गच्छन्ति।

अपरे तु स्वार्थनिष्पादनपरैः दोषानपि गुणपक्षमध्यारोपयद्भिः प्रतारणकुशलैर्धूर्तैः प्रतार्यमाणा वित्तमदमत्तचित्ता सर्वजनोपहास्यतामुपयान्ति। न मानयन्ति मान्यान्, जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धोपदेशम्। कुप्यन्ति हितवादिने सर्वथा तमभिनन्दन्ति, तं संवर्धयन्ति, तस्य वचनं श्रृण्वन्ति, तं बहु मन्यन्ते योऽहर्निशम् अनवरतं विगतान्यकर्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति।

तदतिकुटिलचेष्टादारुणे राज्यतन्त्रे, अस्मिन् महामोहकारिणि च यौवने कुमार ! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपलभ्यसे सुहृद्भिः न शोच्यते विद्वद्भिः। यथा च न प्रकाश्यते विटैः, न प्रहस्यसे कुशलैः नास्वाद्यसे भुजङ्गैः नावलुप्यसे सेवकवृकैः, न वञ्च्यसे धूर्तैः, न प्रलोभ्यसे वनिताभिः, न विडम्ब्यसे लक्ष्म्या, न नर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, नाक्षिप्यसे विषयैः, नावकृष्यसे रागेण, नापह्रियसे सुखेन।

इदमेव च पुनः पुनरभिधीयसे विद्वांसमपि, सचेतसमपि, महासत्त्वमपि, अभिजातमपि, धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरित्येतावदभिधायोपशशाम।

चन्द्रापीडस्ताभिरुपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, निर्मृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलङ्कृत इव, पवित्रीकृत इव, उद्भासित इव, प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम।

# नवमः पाठः

# वैदिकलौकिकछन्दांसि

वैदिकलौकिकवाङ्मये छन्दो विशिष्टं स्थानं भजते। वेदार्थनिर्णये महर्षिभिः आचार्यैश्च अस्य वेदाङ्गत्वं स्वीकृतम्। पाणिनीयशिक्षायां "छन्दः पादौ तु वेदस्य" इत्युक्त्वा छन्दसां महत्त्वं प्रतिपादितमस्ति। वेदाः छन्दोबद्धा वर्तन्ते, तेषाम् उच्चारणाय अर्थावबोधनाय च छन्दोज्ञानं परमावश्यकम्। यो हि छन्दांसि अविदित्वा यज्ञादिकार्याणि साधयति, वेदान् अधीते, अध्यापयति वा सः पापो भवति। वैदिकमन्त्रोच्चारणप्रयोजनपूर्तये छन्दसाम् अध्ययनम् परमावश्यकं विद्यते।

ऋग्सामवेदयोः सर्वेऽपि मन्त्राः छन्दोबद्धा वर्तन्ते। यजुर्वेदस्यापि गद्यात्मकाः पद्यात्मकाश्च सर्वे ऋचः छन्दोबद्धा एव विद्यन्ते। एकाक्षरादारभ्य चतुरुत्तरशताक्षराणां (१०४) छन्दसां विधानं विहितम्। छन्दस्सूत्रस्य प्रारम्भिकेषु चतुर्षु अध्यायेषु वैदिकच्छन्दसां विवरणं लभ्यते।

अस्य शास्त्रस्य छन्दोऽनुशासनं, छन्दोविवृतिः, छन्दोनाम, छन्दोविचितिः इत्यादि-प्राचीननामानि अपि लभ्यन्ते। अस्य छन्दोनाम्नः वेदाङ्गस्य पिङ्गलकृतं 'छन्दःशास्त्रं' प्रतिनिधिभूतो ग्रन्थः। अस्मिन् ग्रन्थे वैदिक-लौकिकानां छन्दसां विवरणं प्राप्यते।

### वैदिकदृष्ट्या छन्दसो भेदाः

वैदिकच्छन्दसां नैके भेदा वर्तन्ते। तेषु गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, अष्टिः, अत्यष्टिः, धृतिः, अतिधृतिः, कृतिः, प्रकृतिः, आकृतिः, विकृतिः, संस्कृतिः, अभिकृतिः, उत्कृतिश्च त्रिसप्तकेषु विभक्तानि एकविंशतिः छन्दांसि प्राप्यन्ते। मैत्रायणीसंहितायां सप्तैव छन्दांसि इत्युक्तम्। नैके आचार्याः सप्त छन्दांसि एव मन्यन्ते।

**अवधेयांशः** - ध्यातव्यमस्ति यत्, वैदिकच्छन्दांसि अक्षरप्राधान्यमेव आवहन्ति। अर्थात्, इह अक्षराणामेव गणना विधीयते, न तु मात्राणाम्। अमीषां छन्दसाम् अक्षरविवरणम् अधः प्रदत्तमस्ति।

**गायत्र्यादि छन्दांसि** - १. गायत्री (२४ अक्षराणि)। २. उष्णिक् (२८)। ३. अनुष्टुप् (३२)। ४. बृहती (३६)। पङ्क्तिः (४०)। त्रिष्टुप् (४४)। जगती (४८)।

**द्वितीयसप्तके छन्दांसि** - १. अतिजगती (५२)। २. शक्वरी (५६)। ३. अतिशक्वरी (६०)। ४. अष्टिः (६४)। ५. अत्यष्टिः (६८)। ६. धृतिः (७२)। ७. अतिधृतिः (७६)।

**तृतीयसप्तके छन्दांसि** - १. कृतिः (८०)। २. प्रकृतिः (८४)। ३. आकृतिः (८८)। ४. विकृतिः (९२)। ५. संस्कृतिः (९६)। ६. अभिकृतिः (१००)। ७. उत्कृतिः (१०४)।

## लौकिकदृष्ट्या छन्दोभेदः

पिङ्गलः छन्दःसूत्रेषु लौकिकछन्दसः द्विविधत्वं विधत्ते। यथा- १. वर्णच्छन्दः वृत्तं वा २. मात्रिकच्छन्दः जातिः वा।

## वर्णच्छन्दः (वृत्तम्)

**"अक्षरैर्गणना यत्र तद् वृत्तम् इत्युच्यते"** यच्छन्दः वर्णगणनया परिमीयते तद् वर्णच्छन्दः वृत्तं वा उच्यते। अस्य अपरं नाम वार्णिकछन्दोऽपि। यथा - इन्द्रवज्रा, वंशस्थः, शिखरिणी इत्यादयः।

## मात्रिकच्छन्दः (जातिः)

**"जातिर्मात्रा कृता भवेत्"** यच्छन्दः मात्रागणनया परिमीयते तद् मात्रिकच्छन्दः। अस्यापरं नाम जातिः इति। एषु छन्दस्सु मात्रागणनया स्वरूपं निश्चीयते। यथा - आर्या।

**पादः - "ज्ञेयः पादश्चतुर्थांशः"** छन्दसः चतुर्थो भागः "पादः" इत्युच्यते। पादपर्यायवाचित्वेन छन्दःशास्त्रे 'चरण'पदस्य प्रयोगोऽपि प्राप्यते।

**वर्णः- "वृणोति वाङ्मयमिति वर्णः"** तदेव क्षरणरहितधर्मत्वात् अक्षरमपि कथ्यते। इह छन्दःशास्त्रे एकस्मिन् काले उच्चार्यमाणः शब्दांश एव अक्षरम् इति निगद्यते।

**मात्रा-** वर्णानामुच्चारणकालो 'मात्रा' इत्युच्यते। ता मात्रा त्रिविधा ह्रस्व-दीर्घ-प्लुतभेदात्। छन्दःशास्त्रे मात्राणां गणनायै स्वराणां लघुः गुरुः वा संज्ञा विधीयते।

**लघुः-** छन्दःशास्त्रे ह्रस्वसंज्ञः स्वरः लघुसंज्ञो भवति। छन्दो लक्षणेषु अस्य निर्देशः 'ल' इति पदेन क्रियते, अस्य संकेतचिह्नं च सरलरेखासदृशं (।) भवति।

**गुरुः-** दीर्घसंज्ञः स्वरः गुरुः उच्यते। छन्दस्सु अनुस्वारेण सहितः, विसर्गेण युक्तः, संयोगपूर्वः, पदान्तगो ह्रस्ववर्णश्च गुरुसंज्ञको भवति। पदान्ते विद्यमानः गुरुवर्णोऽपि क्वचित् विकल्पेन लघुः मन्यते। छन्दो लक्षणेषु गुरुवर्णस्य निर्देशः 'ग' इति संक्षिप्ताक्षरेण क्रियते। अस्य संकेतचिह्नं च अवग्रहवत् (ऽ) भवति।

**गणः-** छन्दस्सु वर्णानां मात्राणां च गणनार्थं गणव्यवस्था विधीयते। तत्र वार्णिकच्छन्दस्सु वर्णानां गणनायै वर्णात्मकगणाः प्रयुज्यन्ते। एतैः गणैः छन्दस्सु लघुगुरुवर्णानां क्रमः निश्चीयते। अष्टौ भेदाः भवन्ति ते यथा-

**मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः।**

**जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥**

| | | | | | |
|---|---|---|---|---|---|
| मगणः | ऽऽऽ, | नगणः | ।।। | भगणः | ऽ ।। |
| यगणः | । ऽ ऽ | जगणः | । ऽ । | रगणः | ऽ । ऽ |
| सगणः | ।। ऽ | तगणः | ऽ ऽ । | | |

गणस्वरूपं लघुनोपायेन ज्ञातुमेकं लघुसूत्रमपि विद्यते - "यमाताराजभानसलगाः"

**यतिः-** पद्यपाठे जिह्वायाः विश्रामस्थानं कविभिः यतिः उच्यते। विच्छेदः, विरामः, विरतिः, इत्यादयः यतिपर्यायाः।

## १. अनुष्टुप्

**लक्षणम्-** श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥

**उदाहरणम्-** वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ॥

## २. इन्द्रवज्रा

| तगणः | तगणः | जगणः | ग. ग. |
|---|---|---|---|
| ऽऽ। | ऽऽ। | ।ऽ। | ऽ ऽ |

**लक्षणम्-** "स्यादिन्द्रवज्रा यदि तौ जगौ गः"

अस्य छन्दसः प्रत्येकं चरणे ११ वर्णाः भवन्ति। सर्वेषु पादेषु क्रमशः तगणः, तगणः, जगणः, द्वौ गुरुवर्णौ च भवतः। यद्यपि इह यतिनिर्देशो नास्ति तथापि पञ्चमे, षष्ठे च अक्षरे यतिः भवति।

**उदाहरणम्-** अर्थोहि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

## ३. उपेन्द्रवज्रा

| जगणः | तगणः | जगणः | ग. ग. |
|---|---|---|---|
| ।ऽ। | ऽऽ। | ।ऽ। | ऽ ऽ |

**लक्षणम्** - उपेन्द्रवज्रा जतजास्ततोगौ

अस्य छन्दसः प्रत्येकं पादे ११ वर्णाः भवन्ति। सर्वेषु चरणेषु क्रमशः जगणः, तगणः, जगणः, द्वौ गुरुवर्णौ च भवतः।

**उदाहरणम्** - त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव॥

## ४. शालिनी

| मगणः | तगणः | तगणः | ग. ग. |
|---|---|---|---|
| ऽऽऽ | ऽऽ। | ऽऽ। | ऽ ऽ |

**लक्षणम्** - मात्तौ गौ चेच्छालिनी वेद् लोकैः

प्रत्येकं चरणे ११ वर्णाः भवन्ति। क्रमशः एको मगणः, द्वौ तगणौ, द्वौ च गुरुवर्णौ भवतः तच्छन्दः "शालिनी" इति ज्ञेयम्। चतुर्थे (वेदाः) सप्तमे (लोकाः) चाक्षरे विरामः कार्यः।

**उदाहरणम्** - कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च॥

## ५. भुजङ्गप्रयातम्

| यगणः | यगणः | यगणः | यगणः |
|---|---|---|---|
| ।ऽऽ | ।ऽऽ | ।ऽऽ | ।ऽऽ |

**लक्षणम्** - 'भुजङ्गप्रयातं चतुर्भिर्यकारैः'

प्रत्येकं चरणे १२ वर्णाः भवन्ति। क्रमशः चत्वारः यगणाः भवतः तच्छन्दः भुजङ्गप्रयातम् इति ज्ञेयम्। पदान्ते विरामः कार्यः।

**उदाहरणम्** - नमस्ते सदा वत्सले मातृभूमे त्वया हिन्दुभूमे सुखं वर्धितोऽहम्।
महामङ्गले पुण्यभूमे त्वदर्थे पतत्वेष कायो नमस्ते नमस्ते॥

## ६. हरिणी

| नगणः | सगणः | मगणः | रगणः | सगणः | ल. ग. |
|---|---|---|---|---|---|

।।।  ।।ऽ  ऽऽऽ  ऽ।ऽ  ।।ऽ  । ऽ

**लक्षणम्** - नसमरसलागः षड्वेदैर्हयैर्हरिणी मता।

यस्य छन्दसः प्रतिचरणे नगण-सगण-मगण-रगण-सगणाः लघुगुरू च वर्णाः भवन्ति। तच्छन्दः हरिणी। सप्तदशवर्णाः भवन्ति अस्मिन् छन्दसि। षष्ठे (रसाः) चतुर्थे (वेदाः) सप्तमे (हयैः) च वर्णे विरामः कर्तव्यः।

**उदाहरणम्** - अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥

## ७. शिखरिणी

यगणः  मगणः  नगणः  सगणः  भगणः  ल. ग.

।ऽऽ  ऽऽऽ  ।।।  ।।ऽ  ऽ।।  । ऽ

**लक्षणम्** - रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी।

सप्तदश वर्णाः वर्तन्ते अस्मिन् छन्दसि। क्रमशः यगण-मगण-नगण-सगण-भगणाः लघुगुरुवर्णौ च भवन्ति। अस्मिन् छन्दसि रसैः षड्वर्णान्ते रुद्रैः एकादशवर्णान्ते च यतिः अर्थात् विरामो भवति।

**उदाहरणम्** - यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित् किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥

## ८. द्रुतविलम्बितम्

नगणः  भगणः  भगणः  रगणः

।।।  ऽ।।  ।ऽऽ  ऽ।ऽ

**लक्षणम्** - द्रुतविलम्बितमाह नभौ भरौ

यस्य छन्दसः प्रतिचरणं क्रमशः नगण-भगण-भगण-रगणाः भवन्ति, तत् द्रुतविलम्बितनामकं छन्दो भवति। अस्य प्रत्येकं चरणे द्वादशवर्णाः भवन्ति।

**उदाहरणम्** - इतरपापफलानि यदृच्छया वितर तानि सहे चतुरानन।
अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख! मा लिख! मा लिख!॥

## ९. वसन्ततिलका

तगणः  भगणः  जगणः  जगणः  ग. ग.

ऽऽ।  ऽ।।  ।ऽ।  ।ऽ।  ऽ ऽ

**लक्षणम्** - उक्ता वसन्ततिलका तभजा जगौ गः।

वसन्ततिलकाच्छन्दसः प्रत्येकं चरणे चतुर्दश वर्णाः भवन्ति। क्रमशः तगणः भगणः जगणौ गुरू च भवन्त।

**उदाहरणम्** - यात्येकतोऽस्तशिखरं पतिरोषधीनाम् आविष्कृतोऽरुणपुरः सर एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु॥

## १०. मन्दाक्रान्ता

मगणः  भगणः  नगणः  तगणः  तगणः  ग. ग.

ऽऽऽ  ऽ।।  ।।।  ऽऽ।  ऽऽ।  ऽ ऽ

**लक्षणम्** - "मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्"

अस्मिन् छन्दसि प्रत्येकं चरणे यथाक्रमं मगणः, भगणः, नगणः, द्वौ तगणौ अन्ते च गुरुद्वयम् आगच्छन्ति। अपि च चतुर्थे (अम्बुधिः) षष्ठे (रसाः) सप्तमे (नगाः) वर्णे यतिः भवति, इति सप्तदशवर्णात्मकं छन्दः भवति।

**उदाहरणम्** - कश्चित्कान्ता विरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनया स्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

## ११. शार्दूलविक्रीडितम्

मगणः  सगणः  जगणः  सगणः  तगणः  तगणः  ग.

ऽऽऽ  ।।ऽ  ।ऽ।  ।।ऽ  ऽऽ।  ऽऽ।  ऽ

**लक्षणम्** - सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्

अस्मिन् छन्दसि सर्वेषु पादेषु क्रमशः मगणः, सगणः, जगणः, सगणः, द्वौ तगणौ, अन्ते च गुरुवर्णः भवन्ति। अस्मिन् छन्दसि एकोनविंशतिः अक्षराणि भवन्ति। अस्मिन् छन्दसि द्वादशवर्णे (सूर्यैः) सप्तमवर्णे अश्वैः च विरामो (यतिः) भवति।

**उदाहरणम्** - केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः

न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

## १२. स्रग्धरा

| मगणः | रगणः | भगणः | नगणः | यगणः | यगणः | यगणः |
|---|---|---|---|---|---|---|
| ऽऽऽ | ऽ।ऽ | ऽ।। | ।।। | ।ऽऽ | ।ऽऽ | ।ऽऽ |

**लक्षणम् -** म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुतां स्रग्धरा कीर्तितेयम्

यस्य छन्दसः प्रतिचरणं क्रमशः मगणः, रगणः, भगणः, नगणः, त्रयः यगणाश्च भवन्ति, तच्छन्दः स्रग्धरा इति। एकविंशतिवर्णात्मकेऽस्मिन् छन्दसि प्रतिसप्तमे वर्णे यतिः भवति।

**उदाहरणम् -** या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीज प्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

# दशमः पाठः

# वेदे पर्यावरणविषयकं चिन्तनम्

वरणार्थकाद् वृङ् इति धातोः परि-आङ् इति उपसर्गद्वयपूर्वकाद् ल्युट् प्रत्यये कृते पर्यावरणमिति शब्दो निष्पन्नोऽस्ति। परितः आव्रियते जीवो येन तत् पर्यावरणम्। यमाश्रित्य जीवाः परोक्षं प्रत्यक्षं च भृशं प्रभाविता भवन्ति तदेव पर्यावरणम् इति तात्पर्यम्। अस्मान् परितः ये सन्ति प्रकृतिस्थाः पदार्थाः ते पर्यावरणम् इति परिगण्यन्ते। जीवाः, जन्तवः, वृक्षाः, लताः, जलम्, वायुः, पर्वतः, सरांसि, परिवेशः, अन्ये च ईदृशाः मिलिताः पर्यावरणतत्त्वेषु परिगण्यन्ते। नीरोगितया स्वस्थतया च शुद्धम् अकलुषितं च पर्यावरणम् अपरिहेयम्। यथार्थतः शुद्धा निर्मला प्रकृतिरेव पर्यावरणस्य संवाहिका संरक्षिका च विद्यते, सा प्रकृतिरेव मानवमात्रस्य तर्पयित्री।

वर्त्तमानकाले पर्यावरणप्रदूषणं भीषणं रूपं धृत्वा पीडयति समग्रं विश्वम्। अतः वैज्ञानिकाः, पर्यावरणविशेषज्ञाः च पर्यावरणसमस्यायाः विविधरूपाणि परिशील्य ज्ञात्वा च पर्यावरणसंरक्षणे विविधान् उपायान् उपदिष्टवन्तः। कार्यशालासु, गवेषणसत्रेषु, संगोष्ठीषु, सम्मेलनेषु च पर्यावरणसंरक्षणविषये विद्वद्भिः उपस्थापितान् विचारान् कार्यपथं नीत्वा पर्यावरणप्रदूषणस्य निवारणे वयं समर्था भवेम।

अनियन्त्रिता सती प्रतिक्षणं वायुवेगेन प्रवर्द्धमाना जनसंख्या, मलमूत्रादीनां त्याज्यवस्तूनां यथास्थानम् उत्सर्जना-भावः, भवनादिनिर्माणकार्येण सर्वत्र धूलीविक्षेपः, कृषिक्षेत्रेषु अग्निना तुषकण-धान्यावशेषदाहः, लघुबृहदुद्योगैः त्याज्य-धूमप्रवाहः, वाहनधूमः, अणुविकिरणम्, नदीजले लघुबृहदुद्योगैः त्याज्यस्रावः, वैद्यकीय-त्यागः, प्लास्तिक-त्यागः च पर्यावरण-समस्यायाः मूलानि कारणानि सन्ति। मनुष्याणाम् आचारविहीनता, भूमेः उर्वरकत्व- संवर्धनार्थम् उर्वरकस्य प्रयोगः, वृक्षसस्यादीनां कर्त्तनम्, पर्वतानां विलयः, नदीनां धारावरोधादयः च पर्यावरणप्रदूषणस्य उपोद्बलकानि सन्ति।

वेदमन्त्रेषु पर्यावरणस्य संरक्षणार्थमपि प्रेरणा प्रदत्ता, वेदेषु पर्यावरणस्य संरक्षणार्थं लोकमङ्गलार्थं च उपाया वर्णिता विद्यन्ते। "नमो वृक्षेभ्यः। ओषधीनां पतये नमः। अरण्यानां पतये नमः। नमो वन्याय च।" इति नानामन्त्रेषु वृक्षेभ्यः श्रद्धापूर्वकं नमस्काराः प्रस्तुताः संश्रूयन्ते।

वृक्षा वनस्पतय ओषधयश्च सर्वेषां कृते मधुमयाः हितसाधिकाः, शान्तिप्रदाश्च भवेयुरित्येताः भावनाः ऋग्वेदस्य प्रथममण्डले नवतितमे सूक्ते अन्यत्र वेदेषु च अभिव्यक्ताः दृश्यन्ते।

**मधु वाता ऋतायते मधुं क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः** ॥१.९०.६॥

**मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता** ॥१.९०.७॥

**मधुमान्नो वनस्पतिर्मधुमान् अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः** ॥१.९०.८॥

वायुः मधुमयो भवतु, नद्यः मधुजलधारां संस्रावयन्तु, ओषधयो मधुमया भवन्तु, रात्रिः मधुरा भवतु, उषाकालः मधुमयो भवतु, पृथिव्याः प्रत्येकं रजः अपि मधुरं भवतु, अस्माकं संरक्षकः द्युलोकः माधुर्ययुतः भवतु, रोगेभ्यः संरक्षकः वनस्पतिः मधुरः भवतु, सूर्यः मधुरो भवतु, गावः मधुरक्षीरप्रदा भवन्तु इति।

अस्माकम् ऋषयः पर्यावरणज्ञा वर्तन्ते। अत एव आध्यात्मिकदृष्ट्या पर्यावरणसंरक्षणोपायाः प्रतिपादिताः वेदेषु शास्त्रेषु पुराणेषु च। तथा हि- **द्यौः शान्तिरन्तरिक्षं शान्तिः पृथ्वी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिः ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि।** इत्यस्मिन् (शुक्लयजुर्वेदः ३६/१७) मन्त्रे द्यौः, अन्तरिक्षम्, पृथ्वी, आपः, ओषधयः, वनस्पतयः, विश्वे देवाः च उपलक्ष्य समष्टिरूपेण पर्यावरणसंरक्षणाय शान्तेः प्रार्थना कृता। अतो वेदमन्त्रेषु विहितया रीत्या भूमि-जल-वाय्वाकाशानां प्रदूषणस्य निषेधः पर्यावरणसंरक्षणाय अतितराम् आवश्यकः समीचीनतमः च पन्थाः, ऋषीणां नीतिविदां निर्णयश्च विद्यते।

संस्कृतवाङ्मयेऽपि पर्यावरणविषयकं सुष्ठु ज्ञानं लभ्यते, वृक्षमहत्त्वं च वर्णितमस्ति । वृक्षाणां स्पर्श-श्रवण-दर्शन-घ्राण-रसन-पान-चैतन्य-वृद्धि-गुणाः सन्तीति महाभारतस्य महर्षिः भृगुः प्रतिपादयति। भगवान् श्रीकृष्णः गीतायां “अश्वत्थः सर्ववृक्षाणाम्” इति (१०.२६) निगदन् अश्वत्थस्य श्रेष्ठतां प्रतिपादयामास ।

# एकादशः पाठः

## अलङ्काराः

अलङ्क्रियते अनेन इति अलङ्कारः, अलङ्करोति इति अलङ्कारः वा इति व्युत्पत्त्या अलङ्कारशब्देन शोभादायकं वस्तुतत्त्वं वा उच्यते। लोके यथा अलङ्काराः भावाकृतिं भूषयन्ति तस्य शोभां वर्धयन्ति, तथैव अलङ्काराः काव्यस्य सौन्दर्यम् अभिवर्धयन्ति। अयं च अलङ्कारः द्विविधः- शब्दालङ्कारः, अर्थालङ्कारश्च।

### १. शब्दालङ्कारः यथा-

शब्दश्रवणमात्रेण यत्र रमणीयता अनुभूयते तत्र शब्दालङ्कारः। **यथा- अनुप्रासः, यमकम्, श्लेषः, वक्रोक्तिः** इत्यादयः।

### अनुप्रासः

**लक्षणम्** - "एकस्यैव व्यञ्जनस्य अनेकावृत्तिः अनुप्रासः।
अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्"।

शब्दानां सादृश्यं यत्र सः अनुप्रासः। 'अत्र शब्दसाम्यं' इत्यस्याभिप्रायः अस्ति यत् शब्दसाम्ये स्वरव्यञ्जनयोः उभयोः अनिवार्यता नास्ति। स्वराणाम् असादृश्येऽपि व्यञ्जनानां सादृश्यं भवति।

**उदाहरणम्** - अयिगिरिनन्दिनि नन्दितमेदिनिविश्वविनोदिनि नन्दनुते।
अत्र 'द' कारस्य 'न' कारस्य च अनेकावृत्तिः भवति। अतः अनुप्रासालङ्कारः।

### यमकालङ्कारः

**लक्षणम्** - एकस्यैव शब्दस्य अनेकावृत्तिः यमकः।
सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥

यत्र सार्थकयोः परन्तु परस्परं भिन्नार्थकयोः द्वयोः वर्णसंघातयोः क्रमेण आवृत्तिर्भवति तत्र यमकालङ्कारः जायते। यमकशब्दस्य अर्थः युगलं युग्मं वा भवति।

**उदाहरणम्** - नवपलाश-पलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः॥

### श्लेषालङ्कारः

**लक्षणम्** - "श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते" अथवा "अनेकार्थशब्दविन्यासः श्लेषः"।

यत्र वाक्ये पदे वा अनेकार्थाः भासन्ते तत्र श्लेषालङ्कारः।

**उदाहरणम् -** सर्वदो माधवः पायात्

**अन्वयः -** अत्र सर्वदः माधवः रक्षतु इति एकः अर्थः। सर्वदा माधवः शिवः रक्षतु इति अपरः अर्थः।

**उदाहरणं यथा-** नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजम्

अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम्।

हृदन्तरे निरन्तरं वसन्तमेव योगिनां

तमेकदन्तमेव तं विचिन्तयामि सन्ततम्॥

## २. अर्थालङ्कारः

अर्थानुसन्धानेन यत्र रमणीयता प्रतीयते तत्र अर्थालङ्कारः। यथा- उपमा, रूपकः, उत्प्रेक्षादयः।

### उपमालङ्कारः

**लक्षणम्-** "उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः"। अथवा "प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते"।

उपमानम्, उपमेयम्, साधारणधर्मः, उपमानवाचकशब्दः चेति चत्वारः अंशाः भवन्ति।

१. उपमानम् - येन सह सादृश्यं वर्ण्यते तत् उपमानम्।

२. उपमेयम् - वर्ण्यवस्तु उपमेयम्।

३. साधारणधर्मः - द्वयोः सादृश्यमेव साधारणधर्मः ।

४. उपमानवाचकाः - इव, वत्, सम, तुल्य, यथा इत्यादयः।

**उदाहरणम् -** कमलमिव चारु वदनम्

**समन्वयः -** अस्मिन् उदाहरणे उपमालङ्कारस्य अंशाः एवं भवन्ति।

उपमानम्- कमलम् । उपमेयम्- वदनम्। साधारण धर्मः- चारुत्वम्। उपमानवाचकम्- इव

### रूपकालङ्कारः

**लक्षणम् -** "तद्रूपकमभेदो यः उपमानोपमेययोः"।

'रूपयति इति रूपकम्' अर्थात् यत्र उपमानस्य आरोपणम् उपमेये भवति तत्र रूपकम्। यथा-

**उदाहरणम् -** ज्ञानामृतं पीत्वा तुष्टः।

अस्मिन् उदाहरणे उपमान-उपमेययोः ज्ञान-अमृतयो अभेदः वर्णितः।

उदाहरणम् - संसारविषवृक्षस्य द्वे एव रसवत्फले

काव्यामृतरसास्वादः संगमः सज्जनैः सह।

## उत्प्रेक्षालङ्कारः

**लक्षणम् -** "भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"। "सम्भावना स्यादुत्प्रेक्षा"।

यत्र उपमेयम् उपमानत्वेन सम्भाव्यते तत्र उत्प्रेक्षा। उत्प्रेक्षा शब्दस्य अर्थः सम्भावना एव। उत्प्रेक्षालङ्कारबोधकैः मन्ये, शङ्के, ध्रुवम्, प्रायः, इव, नूनमित्यादिभिः शब्दैः उत्प्रेक्षा द्योत्यते।

**उदाहरणम् -** मुखं भूमिगतं चन्द्रं मन्ये।

**विवरणम् -** अत्र आकाशस्थितः चन्द्र एव भूमिं प्रति आगतवान् वा इति संशयः एव सम्भावना।

**उदाहरणम् -** लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥

## अर्थाऽन्तरन्यासः

**लक्षणम् -** "सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा"॥

यत्र सामान्येन विशेषस्य समर्थनम् अथवा विशेषेण सामान्यस्य समर्थनं भवति तत्र अर्थान्तरन्यासः।

**विशेषस्य सामान्येन समर्थनम्**

**उदाहरणम् -** "हनूमान् अब्धिमतरत् दुष्करं किं महात्मनाम्" अत्र हनूमतः समुद्रलङ्घनं नाम विशिष्टं कार्यं किं-दुष्करं महात्मनाम् इति सामान्यत्वेन समर्थितं भवति।

**सामान्यस्य विशेषेण समर्थनम्**

**उदाहरणम् -** बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा॥

अत्र पूर्वार्धगतः सामान्योऽर्थः वृहत्सहायः क्षोदीयानपि कार्यान्तं गच्छति इति द्वितीयार्धगतेन विशेषेण अर्थेन। नगापगाः महानद्या सम्भूय अम्भोधिम् अभ्येति समर्थ्येत अतः अर्थान्तरन्यासोऽलङ्कारः।

# द्वादशः पाठः

## गीतामृतम्

महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता वर्तते। इयं गीता इतिहासस्यांश एव न अपि तु सर्वासामपि उपनिषदां सारभूतम् एवं वेदान्तदर्शनादि-विविधदार्शनिकतत्त्वानाञ्च सारं सरलसुबोधमधुरभाषया च बोधयति।

श्रीमद्भगवद्गीतायाम् अष्टादशाध्यायाः तेषु सप्तशतं (७००) श्लोकाः विद्यन्ते। प्रस्तुतेऽस्मिन् पाठे श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन अर्जुनमाध्यमेन लोकहिताय प्रोक्तानां केषाञ्चन श्लोकाः सङ्गृहीताः। अनासक्तभावेनैव कार्यकरणं गीतायाः परमोपदेशः ज्ञानविज्ञानसमन्वयः निष्कामकर्म अनासक्तभावेन क्रियमाणकर्मणो बन्धनमुक्तित्वं कर्तव्यपालनेन श्रेयः सम्पादनं च सकलमपि प्रतिपादनमतीव गभीरतया विहितमस्ति।

(कर्मयोगः)

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥** *(२/४८)*

**अन्वयः** - हे धनञ्जय ! सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु। समत्वं योग उच्यते।

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥** *(२/४६)*

**अन्वयः** - ते अधिकारः कर्मणि एव कदाचन फलेषु मा कर्महेतुः मा भूः ते सङ्गः च अकर्मणि मा अस्तु।

(यज्ञविचारः)

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**
**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवम्॥** *(३/१४)*

**अन्वयः** - भूतानि अन्नात् भवन्ति पर्जन्यात् अन्नसम्भवः पर्जन्यः यज्ञात् भवति यज्ञः कर्मसमुद्भवम्।

(ज्ञानप्राप्तये उपायाः)

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानेनस्तत्त्वदर्शिनः॥** *(४/३४)*

**अन्वयः** - प्रणिपातेन परिप्रश्नेन सेवया तत्त्वदर्शिनः ज्ञानिनः ज्ञानं ते उपदेक्ष्यन्ति तत् त्वं विद्धि।

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**

**तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥** *(४/३८)*

**अन्वयः** - इह ज्ञानेन हि सदृशं पवित्रं न विद्यते। तत् (ज्ञानम्) स्वयं योगसंसिद्धिः कालेन आत्मनि विन्दति।

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥** *(४/३९)*

**अन्वयः** - श्रद्धावान् तत्परः संयतेन्द्रियः ज्ञानं लभते। ज्ञानं लब्ध्वा अचिरेण परां शान्तिम् अधिगच्छति।

**(आत्मयोगः)**

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।**
**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥** *(६/०५)*

**अन्वयः** - आत्मना आत्मानम् उद्धरेत् आत्मानं न अवसादयेत्। आत्मा एव हि आत्मनः बन्धुः आत्मा एव आत्मनः रिपुः।

**(योग्याहारविहारादीनां महत्त्वम्)**

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥** *(६/१७)*

**अन्वयः** - युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य युक्तस्वप्नावबोधस्य योगः दुःखहा भवति।

**(गुणत्रयविभागः)**

**तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।**
**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥** *(१४/०६)*

**अन्वयः** - हे अनघ ! तत्र अनामयं प्रकाशकं सत्त्वं निर्मलत्वात् (आत्मानं) सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति।

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**
**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥** *(१४/०७)*

**अन्वयः** - हे कौन्तेय ! रागात्मकं रजः तृष्णासङ्गसमुद्भवं विद्धि। तत् देहिनं कर्मसङ्गेन निबध्नाति।

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**
**प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥** *(१४/०८)*

**अन्वयः** - हे भारत ! तमः तु सर्वदेहिनां मोहनम् अज्ञानजं विद्धि तत् (देहिनं) प्रमाद-आलस्य-निद्राभिः निबध्नाति।

(नरकस्य द्वारत्रयम्)

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**

**कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥** *(१६/२१)*

**अन्वयः** - कामः क्रोधः तथा लोभः इदं त्रिविधम् आत्मनः नाशनं नरकस्य द्वारम् (अस्ति), तस्मात् एतत् त्रयं त्यजेत्।

(शास्त्रप्रमाणम्)

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**

**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥** *(१६/२४)*

**अन्वयः** - तस्मात् कार्याकार्यव्यवस्थितौ ते शास्त्रं प्रमाणं (अस्ति) शास्त्रविधानोक्तं कर्म ज्ञात्वा (तत्त्वम्) इह कर्तुम् अर्हसि।

(त्रिविधाहारः)

**आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**

**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥** *(१७/०८)*

**अन्वयः** - आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः।

**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।**

**आहारा राजसस्येष्टा दुःखशोकमयप्रदाः॥** *(१७/०९)*

**अन्वयः** - कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः दुःखशोकमयप्रदाः आहाराः राजसस्य इष्टाः (भवन्ति)

**यातयामं गतरसं पूति पर्युषितं च यत्।**

**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥** *(१७/१०)*

**अन्वयः** - यत् यातयामं, गतरसं, पूति पर्युषितं च, उच्छिष्टम् अपि च अमेध्यं भोजनं, तत् तामसप्रियम्।

# त्रयोदशः पाठः

## राष्ट्रैक्यबोधकानि तीर्थानि, स्तोत्राणि च

भारतं पुण्यभूमिः अस्ति। एषा ऋषीणां, मुनीनां, सदाचारनिरतानां, पुण्यकर्मणां तपस्विनां च निवास-भूमिरस्ति। एषा वेदानाम्, उपनिषदां, पुराणानां, भगवद्गीतायाः अन्येषां च ऋषिदृष्टानां वाङ्मयविशेषाणाम् उपदेशभूरस्ति। अस्मिन् भारते जन्मप्राप्तिः पूर्वजन्मनः सुकृतस्य पुण्यस्य वा परिपाक एव अस्ति।

अयोध्या, मथुरा, प्रयागः, पुरी, माया, गया, काशी, काञ्ची, सोमनाथः, अवन्तिका, द्वारावती चेति पुण्याः पुर्यः तीर्थक्षेत्राणि इति प्रतिजनं भावना वरीवर्ति। भारतभूमेः चतसृषु दिक्षु चत्वारि धामानि संस्थापितानि सन्ति, येभ्यः सकाशात् धर्मस्य, प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्म इति उपनिषत्तत्त्वं, ब्रह्मसत्यं जगन्मिथ्येति सघोषम् अद्वैतदर्शनस्य प्रचारं प्रसारं च श्रीशङ्करभगवत्पादाः अकुर्वन्। रामानुजाचार्याः श्रीवैष्णवदर्शनस्य, श्रीमन्मध्वाचार्याः द्वैतदर्शनस्य च प्रसारं प्रचारं नानाप्रदेशेषु अकार्षुः। भारतवर्षस्य पूर्वस्यां दिशि त्रिपुराराज्यं महाभारतीयकाले ययातिवंश्येन त्रिपुरराजेन शासितम् इति ख्यातं सत् विराजते।

पूर्वस्यां दिशि त्रिपुरायां त्रिपुरसुन्दरी, असमप्रदेशे कामाख्यादेवी, उत्कलप्रदेशे पुर्यां श्रीजगन्नाथः, कोणार्के सूर्यमन्दिरे भगवान् सूर्यनारायणो, झारखण्डप्रदेशे रोगहरो श्रीवैद्यनाथः, पश्चिमवङ्गप्रदेशे दक्षिणेश्वरे कालिघट्टे कालिकादेवी च जनान् कृपादृष्ट्या रक्षति।

दक्षिणस्यां दिशि आन्ध्रप्रदेशे श्रीवेङ्कटेश्वरः पद्मावती च, श्रीशैले मल्लिकार्जुनः, तामिलनाडुप्रदेशे श्रीरङ्गनाथः कावेरी च, रामेश्वरे रामेश्वरः, मधुरानगरे मीनाक्षी, काञ्चीपुरे कृपाकटाक्षपरिपूर्णा कामाक्षी भगवान् शिवश्च, श्रीवरदराजभगवान् विष्णुः, माता लक्ष्मीः, कर्णाटके उडुपीश्रीकृष्णः, गोकर्णे श्रीमहाबलेश्वरः, शृङ्गेरौ श्रीविद्याशंकरः, कोल्लूरे च चामुण्डा, महीशूरे महिषासुरमर्दिनी, हम्प्यां विरूपाक्षः विराजते। केरलप्रदेशे गुरुनावूरे श्रीकृष्णः, रुक्मिणी च, पद्मनाभस्वामिमन्दिरे श्रीपद्मनाभः च विराजते। पश्चिमस्यां दिशि मुम्बादेवी, द्वारिकायां श्रीद्वारिकाधीशः, सौराष्ट्रे श्रीसोमनाथः, राजस्थाने श्रीनाथः, पुष्करे ब्रह्मा, महाराष्ट्रे श्रीलक्ष्मीः, श्रीविट्ठलः, सिद्धिविनायकश्च जनानां मनांसि पावयन्ति, मुदं तन्वन्ति च।

उत्तरस्यां दिशि अयोध्यायां श्रीरामः, वाराणस्यां श्रीविश्वनाथः देवी अन्नपूर्णा च, मथुरायां श्रीकृष्णः, बलरामश्च, काश्मीरप्रदेशे मातावैष्णोदेवी, हिमाचलप्रदेशे ज्वालादेवी, उज्जयिन्यां महाकालः,

उत्तराखण्डे देवतात्मा हिमालयः, तदुपत्यकायाः गङ्गा प्रभवति प्रवहति, ततः समीपे प्रवहति यमुना, हिमालये एव बद्रीनाथः, केदारनाथः, ऋषिकेशः, हरिद्वारे हरिः, कनखले शिवः इति परमात्मनः सान्निध्यं जनानां मनांसि पावयति, तारयति च।

सौराष्ट्रे सोमनाथः, श्रीशैले मल्लिकार्जुनः, उज्जयिन्यां महाकालः, ओङ्कारे ममलेश्वरः, परल्यां वैद्यनाथः, डाकिन्यां भीमशङ्करः, सेतुबन्धे रामेश्वरः, दारुकावने नागेशः, काश्यां श्रीविश्वेशः, गौतमीतटे त्र्यम्बकेश्वरः, हिमालये केदारनाथः, महाराष्ट्रे घृष्णेश्वरः इति समग्रे भारते द्वादश ज्योतिर्लिङ्गानि श्रद्धास्थानानि लसन्ति।

श्रीरामायणम्, श्रीमहाभारतं च राष्ट्रस्यास्य गौरवशिखरम् आर्षकाव्यद्वयम्। तत्रानेकानि स्तोत्राणि यथा च श्रीरामायणे आदित्य-हृदयस्तोत्रम्, गङ्गास्तुतिः, श्रीमहाभारते श्रीमद्भगवद्गीता, विष्णुसहस्रनामस्तोत्रम्, श्रीमद्भागवते वेदस्तुतिः, गोपीगीतम्, नारायणकवचम्, पद्मपुराणे श्रीमृत्युञ्जयस्तोत्रम् इत्यादि। पूर्वं वर्णितानां पुण्यक्षेत्राणां, देवतानां च सभक्ति गुणकीर्तनाय अनेके आचार्याः समाजस्य पथदर्शकाः स्तोत्राणि संरचितवन्तः। तानि च यथा - भगवत्पादैः श्रीशङ्कराचार्यैः प्रणीतानि स्तोत्राणि- अन्नपूर्णास्तोत्रम्, वेदसारशिवस्तोत्रम्, दक्षिणामूर्तिस्तोत्रम्, शिवपञ्चाक्षरस्तोत्रम्, शिवानन्दलहरी, सौन्दर्यलहरी, कनकधारास्तवः, अच्युताष्टकम्, मोहमुद्गरस्तोत्रम्, देव्यपराधक्षमार्पणस्तोत्रम्, लिङ्गाष्टकम्, शिवमानसपूजास्तोत्रम्, जगन्नाथाष्टकम्, दशावतारस्तोत्रम्, श्रीहयग्रीवस्तोत्रम्, श्रीवेङ्कटेशस्तोत्रम्, श्रीनृसिंहस्तोत्रम्, श्रीगङ्गाष्टकम्, शिवताण्डवस्तोत्रम्, महिशासुरमर्दिनीस्तोत्रम् इत्यादीनि जनमनांसि हरन्ति। इत्थमेव पण्डितराजो जगन्नाथः गङ्गालहरी, करुणालहरी-अमृतलहरी-लक्ष्मीलहरी-सुधालहरी इति लहरीः पञ्च प्रणिनाय, ताश्च जनमनांसि हरन्ति।

# चतुर्दशः पाठः

## स्वस्थवृत्तम्

धर्मार्थकाममोक्षाणाम् आरोग्यं मूलमुत्तमम् इत्युक्त्या जानीमः यत् चतुर्विधपुरुषार्थ-सिद्धये आरोग्यस्य महिमा कियान् वर्तते इति। परोपकाराय धनाद्यर्जनाय च प्राथम्येन मानवजीवने स्वास्थ्यं सर्वाधिकं सहाय्यं भवति। अतः अस्माकं शरीरस्य स्वास्थ्यलाभार्थं भारतीयाः महर्षयः अनेकान् ग्रन्थान् प्रणिन्युः। येषां ग्रन्थानाम् अध्ययनेन वयं शारीरिकमानसिकबौद्धिकरूपेण हृष्टाः पुष्टाः सन्तः परिवारस्य समाजस्य राष्ट्रस्य च सर्वतोभावेन कार्यं साधयितुं शक्नुमः। अतः निरामयजीवनयापनाय स्वस्थवृत्तम् इति पाठः प्रस्तूयते।

### ब्राह्मे मुहूर्ते उत्थानम्

ब्राह्मे मुहूर्त उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः।
सर्वमेव परित्यज्य शरीरमनुपालयेत्॥

*अष्टाङ्गसंग्रहः, सूत्रस्थानम् - ३.३*

### व्यायामः

शरीरायासजननं कर्म व्यायाम उच्यते।
लाघवं कर्म सामर्थ्यं दीप्ताग्निर्मेदसः क्षयः।
विभक्तघनगात्रत्वं व्यायामादुपजायते॥

*अष्टाङ्गसंग्रहः, सूत्रस्थानम् - ३.६२,६३*

### तैललेपः तैलमर्दनं च

खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयोः।
सद्य एवोपशाम्यन्ति पादाभ्याङ्गनिषेवनात्॥

*चरकसंहिता, सूत्रस्थानम् - ५.९०*

नित्यं स्नेहार्द्रशिरसः शिरः शूलं न जायते।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च॥
इन्द्रियाणि प्रसीदन्ति सुत्वग्भवति चाननम्।
निद्रालाभः सुखं च स्यात् मूर्ध्नि तैलनिषेवनात्॥

*चरकसंहिता, सूत्रस्थानम् - ५.८१, ८२*

### स्नानम्

नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते।
तस्मात् कायविशुद्ध्यर्थं स्नानमादौ विधीयते॥

*बृहत्पाराशरस्मृतिः - २.९४*

उष्णेन शिरसा स्नानमहितं चक्षुषः सदा।
शीतेन शिरसा स्नानं चक्ष्यमिति निर्दिशेत्॥

*चरकसंहिता, चिकित्सास्थानम् - ५.२४*

## स्वच्छवस्त्रधारणम्

अन्यधृतमाला-वस्त्र-पादत्राणधारणनिषेधः।
वासो न धारयेत् जीर्णं मलिनं रक्तमूल्बणम्।
नैव चान्येन विधृतं वस्त्रं पुष्पमुपानहौ॥

*अष्टाङ्गसंग्रहः, सूत्रस्थानम् - ३.३*

## भोजनम्

भोजनान्ते पिबेत् तक्रं वासरान्ते पिबेत् पयः।
निशान्ते च पिबेत् वारि त्रिभी रोगो न जायते॥
आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥

*श्रीमद्भगवद्गीता - १७.८*

## सन्ध्योपासना

प्राणायामं प्रकुर्वीत सूर्योपासनमेव च।
गायत्रीं च जपेत् पश्चादिष्टदेवस्य चार्चनम्॥
प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चस्वमेव च।
प्रच्छन्नापापा जप्येत तपसा वेदवित्तमाः।
क्षान्त्या शुध्यन्ति विद्वांसो दान्तेनाकार्यकारिणः॥

# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

## माध्यमेन सञ्चालिता प्रस्ताविता च राष्ट्रीयादर्शवेदविद्यालयः




# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)


वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in